वर्षम् – ७०
संयुक्ताङ्कः – ८,९
ज्येष्ठाषाढमासौ
विक्रमाब्दः २०७७
युगाब्दः ५१२२
जून, जुलाई २०२०

ISSN 2249-698X

# भारती
## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
(१५ वर्षाणि)
१५००/–

प्रकाशन प्रत्येक माह की 1 तारीख



वर्षर्तौ भारते नार्यो गौरीपूजादिकर्मभिः।
लोका रुद्राभिषेकैश्च धर्माचारान् प्रकुर्वति॥

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | श्रीमद्भगवद्गीतायाः माध्यमेन भगवद्दर्शनम् | आचार्यः डॉ. रामेश्वरप्रसादगुप्तः | ६ |
| ३ | अकथितञ्चेति सूत्रार्थविमर्शः | डॉ. जगदीशप्रसाद जाटः | ९ |
| ४ | नाटकलक्षणरत्नकोशत उद्धृताः ...... | दिव्या शर्मा | १६ |
| ५ | कन्या-पूजनम् | श्रीमती श्वेता दाधीच | १८ |
| ६ | संस्कृत-समाचाराः | डॉ. स्नेहलताशर्मा | १९ |
| ७ | संस्कृत-समाचाराः | डॉ. कुलदीपसिंहः | २० |
| ८ | संस्कृत-समाचाराः | डॉ. द्विजेन्द्रनाथमिश्रः, डॉ. शम्भूनाथझाः | २१ |
| ९ | संस्कृत-समाचाराः | डॉ. घनश्यामहरदेनिया | २३ |
| १० | संस्कृत-समाचाराः | डॉ. महेशकुमारः शर्मा | २४ |
| ११ | अस्माकं गुरवः | वेणीमाधव गो. धर्माधिकारी | २६ |
| १२ | प्रेरकप्रसङ्गशतकम् | सौ. आराधना धर्माधिकारी | २७ |
| १३ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | २८ |
| १४ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ३० |
| १५ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३३ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

**दूरभाषः 0141–2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)**

ISSN2249-698X

।। श्रीशः ।।

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ
स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
श्रीश्यामशरणदेवाचार्यः
( निम्बार्कपीठं सलेमाबादः )
स्वामी रामभद्राचार्यः
( चित्रकूटः )
स्वामी अवधेशानन्दगिरिः
( हरिद्वारम् )
महन्तः गोविन्ददेवगिरिः
( पुणे )
स्वामी राघवाचार्यवेदान्ती
( अग्रपीठं रेवासा )
स्वामी संवित् सोमगिरिः
( बीकानेरम् )
महन्तः प्रतापपुरी
( तारातरामठं बाडमेरम् )
श्रीदामोदरदासमोदी ( जयपुरम् )

सम्पादकमण्डलम्

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्रोफेसर श्रीकृष्णशर्मा

प्रबन्धसम्पादकः
सुदामाशर्मा

सहसम्पादकौ
प्रोफेसर सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

सहायकसम्पादकः
डॉ. स्नेहलताशर्मा

भारतीयसंस्कृतप्रचारसंस्थानम्

अध्यक्षः
प्रोफेसर शंकरप्रसादशुक्लः

उपाध्यक्षौ
डॉ. नाथूलालसुमनः
डॉ. नन्दसिंहनरूकाः

सचिवः
डॉ. सुधीरकुमारशर्मा

सहसचिवः
कृष्णकुमारशर्मा

व्यवस्थापकः
राजीवदाधीचः
9352030291

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

वर्षम् 70 संयुक्ताङ्कः -8,9
ज्येष्ठाषाढमासौ:
विक्रमाब्दः 2077
जून, जुलाई 2020

एकस्याः प्रतेः 15/-
वार्षिकशुल्कम् 120/-
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- ( 15 वर्षाणि )

सम्पादकीयम्

# वंशीधरो यथा पूज्यश्चक्रधरस्तथैव नः

...✍ प्रोफेसर श्रीकृष्णशर्मा

ऐषमो जून मासस्य पञ्चदशदिनाङ्के पञ्चदश-सहस्र 'फुट' परिमितोच्चैः स्थिते 'गलवान्घाटी' शिखरे अपराह्ले चतुर्वादनतो मध्यरात्रिपर्यन्तं भारत-चीन-सैनिकेषु परस्परं हिंसकघटनाः सञ्जाताः। विवादस्य किं कारणमिति जिज्ञासा चेदस्ति, अवधीयताम्।

चीनदेशस्य मनःक्षोभस्य कारणमस्ति 255 किलोमीटरपरिमितस्य राजमार्गस्य (Road) निर्माणम्, यो हि राजमार्गो भारतीयसैनिकानां कृते पूर्वी लद्दाखक्षेत्रे यातायातं सुगमं करोति। लद्दाखसीमाया अन्तिमो ग्रामः 'श्योक' नामाऽस्ति। तस्माद् ग्रामाद् 'दौलतबेग-ओल्डी' पर्यन्तं राजमार्गस्य निर्माणकार्यं पञ्चदशवर्षेभ्यः प्राक् समारब्धमासीद्, अधुना च सम्पन्नप्रायं वर्तते। अस्य लघुभागे 'गलवान्' क्षेत्रे समारब्धकार्ये चीनदेशस्या-पत्तिः। तदापत्तौ सत्यामपि भारतदेशः स्वक्षेत्रे राजमार्ग-निर्माणकार्यं तीव्रगत्या सम्पादयति।

विवादमेनमपाकर्तुम् उभयतोऽधिकारिणां नैक-वारं परस्परं वार्त्ताः सञ्जाताः। 06.06.2020 दिनाङ्के 'लेफ्टिनेण्ट जनरल' स्तरीयवार्त्तासु निर्णीतमासीद् यद् उभयपक्षीयाः सैनिका पृष्ठतो गच्छेयुः। निर्णयस्यास्य क्रियान्वितिकाले सैनिका निरायुधा भवन्तीति अन्तर्मेधा (Understanding) भवति। किन्तु 15-06-2020 दिनाङ्के क्रियान्वितिवेलायां चीनदेशस्य राजनीतिक-नेतृत्वसंकेतसहायैः चीनसैनिकैः विश्वासघातो विहितः। पूर्वतोऽन्तर्धापितैः लौहकण्टकाविष्टदण्डैः भारतीय सैनिकानामुपरि पृष्ठे वारं कृत्वा प्रघातो विहितः। निःशस्त्रा अपि भारतीयाः सैनिका अविस्मरणीयं पराक्रमं दर्शितवन्तः। केषाञ्चन गलमाकुञ्च्य, अस्थीनि च प्रभज्य व्यापादनं कृतम्। अपरेषाञ्च शत्रुहस्तेभ्यो दण्डान् अपहृत्य प्राणान् निरसारयन्।

परस्परमस्मिन् सङ्घर्षे अन्धन्तमायां रात्रौ शिखराद् उभयपक्षतः सैनिका हिमजलमय्यां 'गलवान्' नद्यां न्यपतन्। तैलङ्गाना-वास्तव्यः कर्नल सन्तोषबाबू महोदयसहिता विंशतिसंख्याकाः भारतीयसैनिका मातृभूमिरक्षायै प्राणान् त्यक्तवन्तः। राष्ट्रभक्तसैनिकानां राजकीयसम्मानपूर्वकं स्व-स्वनिवासक्षेत्रेऽन्त्येष्टिकर्म परिवारजनैः कारितम्। चीनदेशीया अपि प्रायेण पञ्चाशत् संख्यकाः सैनिका गतप्राणाः, किन्तु नाधिकारिकी घोषणाऽद्यावधि विहिता, राजकीयसम्मानस्य तु वार्त्तैव का?

1962 तमेऽपि ख्रीस्ताब्दे 'गलवान् दरी' (Valley) क्षेत्रादेव युद्धं बभूव। तदानीं चीनदेशेन अस्माकं 'अक्साई चीनक्षेत्रम्' बलाद् अपहृत्य अधिकृतम्। वस्तुतश्चीनदेशो विस्तारवादस्य अति-महत्त्वाकाङ्क्षां पालयति। भारत-तिब्बत-नेपाल-मंगोलिया-तुर्कमनिस्तान-हाँगकाँग-ताइवान-जापान-प्रभृतयः प्रतिवेशिनो देशाश्चीनदेशस्य विस्तारवादनयात् पीडितास्सन्ति।

अधुना भारतवर्षः सशक्तराष्ट्रं वर्तते। नास्ति 1962 तमीया नेहरुकालिकीदानीं स्थितिः। अस्माकं जल-थल-नभसेनायां सैन्यदलं सेनानायकाश्च सर्वथा पराक्रमं भजन्ते। राष्ट्रस्य प्रधानमन्त्रिणः सेनायाः मनोबलं निरन्तरं वर्धयन्ति। आधुनिकतमैश्शस्त्रैश्च सेनां

सुसज्जयन्ति। सैनिका अपि कवचायितशरीराः सन्तो राष्ट्रसेवायै समर्पितजीवनाः सन्ति। चीनदेशोऽधुना भारतं संकटायितुं पाकिस्तान-नेपाल-ईरानदेशानपि कुचेष्टयितु मुत्तेजयति। परिणामतोऽधुना भारतीयसैनिकाः चीन-पाकिस्तान-नेपाल-देशान् एकस्मिन् एव काले पराजयितुं सङ्घर्षरतास्सन्ति। वस्तुतस्तु भारतं निर्बलं भ्रमेण मत्वा चीनदेशोऽधुना स्वकीय एव जाले स्वयमेव बद्ध इवानुभवति। प्रायेण सशक्ताः समेऽपि देशाः अमेरिका-ब्रिटेन-आस्ट्रेलिया-इजरायल प्रभृतयश्चीन-देशस्य कुटिलां नीतिमन्वीक्ष्य प्रतिकूलाः सञ्जाताः, भारतं प्रति च सुहृद्भावं भजन्ते।

अस्माकं प्रधानमंत्री श्रीनरेन्द्रमोदी अधुना विश्वस्मिन् जगति स्वच्छच्छविमवाप्य विशिष्टस्थानं भजते। चीनदेशेन सह संर्घषस्याविरामे सति 03-07-2020 दिनाङ्के अकस्माद् लद्दाखक्षेत्रेऽग्रिम 'नीमू' नामकं सैन्यस्थानं गत्वा थलसेनायाः, आई.टी.बी.पी. एवं वायुसेनायाः सैनिकैः सह हार्देन मिलितवान्। विशेषत उपचारस्थलं गत्वा व्रणितसैनिकानाम् अभिनन्दनम् उत्साहवर्धनञ्च कृतवान्। सोत्साहं तत्रैकमुद्बोधनं दत्तवान् **यद्वयं भारतीयाः वंशीविभूषितकरं देवकी-सुतं नन्दनन्दनं बालकृष्णं भजामहे, किन्तु कुमतीनां कृते सुदर्शनचक्रधारिणं भगवद्गीतोपदेशकं कर्मणि कुशलं श्रीकृष्णम् अपि आदर्शरूपेण मन्यामहे।** वयं न कदापि शत्रोः समक्षं कादर्येण अवनता अभूम, न च भविष्यामः। विस्तारवादिनो देशा अस्तंगमिता इति ऐतिह्यं वर्तते। नेदं युगं विस्तारवादस्य। प्रधानमन्त्रिणाऽस्मिन्नव-सरे कविवरस्य रामधारीसिंहदिनकरस्य कवित्वमप्येकं श्रावितम्-

**'जिन के सिंहनाद से सहमी,**
**धरती रही अभी तक डोल।**
**कलम ! आज उनकी जय बोल।।'**

इत्थम् प्रधानमन्त्रिणा स्पष्टमुद्घोषितं यद् भारतवर्षः प्रारम्भादेव शान्तिप्रियो देशः। 'ओम् शान्तिः शान्तिः शान्तिः' इत्यस्माकं बीजमन्त्रः। परमनेन अस्माकं निर्बलतां कोऽपि स्वप्नेऽपि न विजानीयात्। यदि शान्त्या कोऽपि सन्मार्गं नानुसरति, तदा तत्प्रतिकाराय वयं युद्धायापि तत्परा भवामः। प्रधानमन्त्रिणां सिंहनादानन्तरं 'राष्ट्रिय-सुरक्षा-परामर्शक' (N.S.A.) श्रीअजित-डोभालकरमहोदयेन सह चीनदेशस्याधिकारिणोऽधुना निर्णायकवार्त्तालापं विधाय युद्धाद् विरम्य पृष्ठतोऽनुधावनं कर्तुम् स्वसैनिकान् आदिष्टवन्तः, प्रक्रिया च समारब्धा इति शुभसङ्केतः।

वस्तुतश्चीनदेशस्य 'वुहान' नगराद् विश्वस्मिन् जगति 'कोरोना वायरस' इति व्याधिः प्रसृतो जातः। प्रायेण वायरसजन्याः व्याधयश्चीनदेशादेव बहोः कालात् प्रसारं प्राप्नुवन्तीतिहासो जातः। कोरोना-व्याधिना तु सम्पूर्णेऽवनीतले प्रायेण षड्लक्षपरिमिताः (Six Lakhs) जना अकालमृत्युं गता इदानीं यावत्, भूयसी संख्या च प्रतिदिनं वर्धत एव, कुत्रापि न कापि सुदृढा गव्यादिचिकित्सा (Vacceene) गवेषिता। सर्वत्र आर्थिकी स्थितिर्ध्वस्ता जाता। अतः सम्पूर्णं जगत् चीनदेशं प्रति समाक्रुष्टम्। तस्माद् वायरसजन्यकुख्यातेः ध्यानापकर्षणाय चीनदेशोऽधुना प्रतिवेशिदेशान् अकारणं पीडयति। विशेषतो भारतं वर्षं, यतोऽस्माकं प्रधानमन्त्री निखिलेऽपि जगति सुहृद्रूपेण प्रख्यापितो जातः। तेन च देशस्य समुत्कर्षो दिनानुदिनं वर्धत एव, एतदप्य-सूयाकारणम्। अस्तु! चीनदेशोऽपि सद्बुद्धिं धारयेदित्येव परमेश्वरं कामयामहे।

**व्याकरणपीठाध्यक्षचरः**
**जगद्गुरु-रामानन्दाचार्य-**
**राजस्थान-संस्कृत-विश्वविद्यालयः, जयपुरम्**

# श्रीमद्भगवद्गीतायाः माध्यमेन भगवद्दर्शनम्

❑ आचार्यः डॉ. रामेश्वरप्रसादगुप्तः

**''गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।**
**या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता।।''**

श्रीमद्भगवद्गीतामाहात्म्यम्-4

आत्मज्ञानाय परमात्मदर्शनाय वा श्रीमद्भगवद्-गीता श्रेष्ठसाधनमस्ति। मानवजीवनस्य परमं लक्ष्यं परमात्मज्ञानमेव अस्ति। भवबन्धनात् मुक्तिः तु अनेनैव भवति। परमात्मा कः? तस्य स्वरूपं किम्? केन माध्यमेन सः द्रष्टव्यः भवति? परमेश्वरस्य दर्शने बाधकतत्त्वानि कानि सन्ति? इत्यादयः जिज्ञासाः तु नूनमाविर्भूताः भवन्ति। तासां जिज्ञासानां समाधानाय श्रीमद्भगवद्गीता ग्रन्थः साहाय्यं करोति।

श्रीकृष्णद्वैपायनवेदव्यासेन रचितं महाभारतं महाकाव्यम्। तस्य महाकाव्यस्य भीष्मपर्वणः पञ्चविंशतितमोऽध्यायतः द्विचत्वारिंशदध्यायपर्यन्तं गीताशास्त्रं गीतमस्ति। अनेन अष्टादशाध्यायेषु ग्रन्थोऽयं गुम्फितः। सप्तशतश्लोकाः त्वत्र विद्यन्ते। अस्मिन् काव्ये विषादयोगतः मोक्षसंन्यासपर्यन्तम् अष्टादशयोगाः निगदिताः। गीता ब्रह्मविद्याशास्त्रमस्ति। ब्रह्मज्ञानं कारयितुं श्रेष्ठं शास्त्रम् इदमस्ति।

परमात्मा कः? अस्मिन् विषये गीतायां स्पष्टं कृतं, यत्-

**''अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्।**
**विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति।।''**

श्रीमद्भगवद्गीता-2-17

अन्यत्रापि गीतायां परमात्मविग्रहस्य स्वरूपस्य वा विषये एवं निगदितम्-

**''त्वमादिदेवः पुरुषः पुराणः,**
**त्वमस्य विश्वस्य परं निधानम्।**
**वेत्तासि वेद्यं च परं च धाम,**
**त्वया ततं विश्वमनन्तरूप।।'' गीता.11-38।।**

स्पष्टमस्ति, यत् गीतानुसारेण 'परमात्मा' आदिदेवः सनातनः अनन्तः व्यापकश्चैव। सः ' 'सच्चिदानन्द इति त्रिविधरूपेण स्मृतः वर्तते। यथोल्लेखः वर्तते-

**''ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः।**
**ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा।।''**

श्रीमद्भगवद्गीता 17-23

अर्थात् 'ॐ तत्सदिति' सच्चिदानन्दब्रह्मनामरूप-मस्ति। अस्मादेव सृष्टेः प्रभवः तस्याः विस्तारश्च अभवत्।

श्रीमद्भगवद्गीतायां तु अनेकेषु स्थानेषु परमात्म-स्वरूपं स्पष्टं कृतम्। यथा-

**''अक्षरं ब्रह्म परमम्।'' गीता- 8-3**
**''यदक्षरं वेदविदो वदन्ति।'' गीता- 8-11**
**''ओमित्येकाक्षरं ब्रह्म।'' गीता- 8-13**
**''अव्यक्तोऽक्षर इत्युक्तः।'' गीता- 8-21**
**''त्वमक्षरं परमं वेदितव्यम्,**
**त्वमस्य विश्वस्य परं निधानम्।**
**त्वमव्ययः शाश्वतधर्मगोप्ता,**
**सनातनस्त्वं पुरुषो मतो मे''। गीता 11-18**

एतैः प्रमाणैः स्पष्टमस्ति यत् परमात्मा 'अक्षरसच्चिदानन्दः' इत्यस्ति। श्रीमद्भागवतपुराणस्य माहात्म्यप्रकरणे परमात्मविग्रहः तु एवमेव निगदितः यथा-

**''सच्चिदानन्दरूपाय, विश्वोत्पत्त्यादिहेतवे।**
**तापत्रयविनाशाय, श्रीकृष्णाय वयं नुमः।।''** 1-1

गोस्वामितुलसीदासेन स्वरामचरितमानसमहाकाव्ये ''भगवत्स्वरूपः सच्चिदानदः'' इति रूपेण व्यक्तः। यथा-

**''जय सच्चिदानन्द जग पावन।**
**अस कहि चलेउ मनोज नसावन।।''**

रा. च. मा., बालकाण्ड 49-3

**''राम ब्रह्म चिन्मय अविनासी।**
**सर्वरहित सब उर पुर वासी।।''**

रा. च. मा. 1-119-6

**''सोइ सच्चिदानन्द घन रामा।**
**अज विग्यान रूप बल धामा।।''**

रा.च.मा. 7-71 ख-3

जिज्ञासा तूत्पन्ना भवति, यत् गीतानुसारेण ईश्वरस्य परमात्मनः वा निवासः कुत्रास्ति। गीतायां तु स्पष्टोल्लेखः वर्तते, यत् परमात्मा सर्वप्राणिनां हृदयेषु निवसति। यथा वर्णितम्-

**''अहमात्मा गुडाकेश। सर्वभूताशयस्थितः**
**अहमादिश्च मध्यं च भूतानामन्त एव च।।''**

गीता 10-20

अपि च-

**''अविभक्तं च भूतेषु विभक्तमिव च स्थितम्।**
**भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च।।''**

गीता 13-16

अन्यत्रापि कथितम्, यत् -

**''ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।**
**भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया।।''**

गीता 18-61

अथ, प्रश्नस्तु-उद्भवति, यत् ईश्वरस्य दर्शनं कथं भवति? श्रीमद्भगवद्गीता कथयति, यत् परमेश्वरस्य दर्शनं तस्य परिज्ञानं वा विनम्रताभावेन, जिज्ञासाभावेन सेवया च भवति। यथोल्लेखः वर्तते, यत्-

**''तद्विद्धि प्रणिपातेन, परिप्रश्नेन सेवया।**
**उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः।।''**

गीता 4-34

गीतायां परमेश्वरस्य प्राप्तिसाधनरूपेण श्रद्धाभावः व्यक्तः वर्तते। यथोक्तम्-

**''श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः।**
**ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति।।''**

गीता 4-39

भगवत्प्राप्त्यर्थं ब्रह्मचर्यसाधनाऽपि सिद्धिप्रदा भवति। विषयेऽस्मिन् गीतायां कथितम्-

**''यदिच्छन्तो ब्रह्मचर्यं चरन्ति।''** गीता 8-11

स्पष्टमस्ति यत् भगवद्दर्शनाय विनम्रताजिज्ञासा सेवाश्रद्धाब्रह्मचर्यादिगुणानां सन्निधिः त्वपेक्ष्यते। एतेषां गुणानां प्राप्तये अभ्यासः करणीयः वर्तते। यथा वर्णितम्, यत्-

**''अभ्यासयोगयुक्तेन चेतसा नान्यगामिना।**
**परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन्।''** गीता 8-8

अपि च-

**''अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम्।**
**अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय।।''**गीता12-9

गीताकारस्य कथनम् इदमपि अस्ति, यत् मनस्तु चञ्चलं वर्तते। चञ्चलं मनः परमात्मदर्शने बाधकमस्ति।

अत एव मनसः चाञ्चल्यं दूरीकरणाय अभ्यासः त्वपेक्ष्यते तथा च वैराग्यमपि ग्राह्यं वर्तते। यथोक्तं यत्-

''**असंशयं महाबाहो मनो दुर्निग्रहं चलम्।**
**अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।।**'' गीता 6-35

श्रीमद्भगवद्गीतायां परमात्मदर्शने यानि बाधक-तत्त्वानि सन्ति तानि तत्र सम्यक् विवेचितानि। भगवद्दर्शने कामक्रोधलोभादयः बाधकाः सन्ति। विषयेऽस्मिन् गीतायां कथितं यत -

''**काम एष क्रोध एष रजोगुणसमुद्भवः।**
**महाशनो महापाप्मा, विद्ध्येनमिह वैरिणम्।।**''

गीता 3.37

पुनश्च कथितम् यत् -

''**त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।**
**कामः क्रोधस्तथा लोभः तस्मादेतत्त्रयं त्यजेत्।।**''

गीता 16-21

मायाजनिताः कामादयः विकाराः दुरत्ययाः सन्ति। गीताकारेण स्पष्टं कृतं यत् मायाबन्धनात् विमुक्तये परमात्मनः शरणमेव समुचितम्। भगवद्भक्तः मायाबन्धनात् विमुक्तः भवति। उक्तं यत्-

''**दैवी ह्येषा गुणमयी मम माया दुरत्यया।**
**मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते।।**'' गीता 7-14

परमात्मप्राप्तये तस्य साक्षात्काराय वा तं प्रति समर्पणम् आवश्यकमस्ति। विषयेऽस्मिन् गीताकारेण उक्तं यत्-

''**मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।**
**मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः।।**''

गीता 9-34

''**मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः।**
**निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव।।**''

गीता 11-55

भगवत्प्राप्त्यर्थं निर्विकारिता अपि अपरिहार्या भवति। उल्लिखितं गीतायां तु अस्मिन् विषये यत्-

''**अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम्।**
**विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते।।**''

गीता 18-53

अनेन सिद्धमिदं यत् निर्विकारिणः भगवद्भक्ताः प्रशान्ताः भूत्वा परमात्मसाक्षात्कारं कुर्वन्ति। यथोल्लेखः यत्-

''**प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम्।**
**उपैति शान्तरजसं ब्रह्मभूतमकल्मषम्।।**'' गीता 6-27

अपि च-

''**विहाय कामान् यः सर्वान् पुमांश्चरति निःस्पृहः।**
**निर्ममो निरहंकारः स शान्तिमधिगच्छति।।**''

गीता 2-71

अस्तु, मानमोहरहिताः द्वन्द्वातीताः जनाः त्वात्मज्ञाः भूत्वा परमात्मानं प्राप्नुवन्ति। यथोल्लेखः यत्-

''**निर्मानमोहा जितसङ्गदोषा**
**अध्यात्मनित्या विनिवृत्तकामाः।**
**द्वन्द्वैर्विमुक्ताः सुखदुःखसञ्ज्ञै-**
**र्गच्छन्त्यमूढाः पदमव्ययं तत्।।**'' गीता 15-5

निष्कर्षतः परमात्मसाक्षात्कारार्थं गीतानुसारेण षट्सम्पदामर्जनं तथा च षड्विकाराणां विमोचनं तु आवश्यकं वर्तते। इति शम्।

**सेवानिवृत्तः संस्कृतप्राध्यापकः**
**श्रीमतीलक्ष्मीगुप्ताभवनम्, उद्योगविभागस्य समीपे,**
**सिविललाइन्स, दतिया (म.प्र.) 475661**
**दूरभाष : 09826249448**

# अकथितञ्चेति सूत्रार्थविमर्शः

❑ डॉ. जगदीशप्रसाद जाटः

इह सूत्रे अकथितमिति चेति पदद्वयम्। तत्र च पदं यथापेक्षमर्थं समुच्चिनोति, अपादानकर्मत्वविषयविभागं च व्यवस्थापयति। अकथितमिति पदञ्च कथननिवृति-परमसङ्कीर्तितमनुक्तविवक्षितमर्थमिहाभिधत्ते, नाप्रधानं रूढम्, भाष्यकृद्व्याख्यानात्। व्याख्यानञ्च भाष्यकृतः केनाकथितम्? अपादानादिभिर्विशेषकथाभिः इति प्रश्नप्रतिवचनरूपम्। इह हि कथं वाक्यप्रबन्धे इत्यस्मान्निष्पन्नं नञा युक्तमकथितमिति क्रियापदं प्रयुक्तम्, अत एव केनेति प्रश्नः? व्युत्पत्त्यर्थमेव क्रियोपादीयते, न तु प्रवृत्तिनिमित्तत्त्वार्थम्। तथा च गच्छतीति गौरिति व्युत्पत्तावपि गच्छतीत्युक्ते केनेति प्रश्ने रथेनेति प्रतिवचनं भवति तथा गौरित्युक्ते प्रश्नप्रतिवचने न भवतः। तस्मान्नाप्रधानवाचि रुढमिदम्। अन्यथा ब्राह्मणस्य पुत्रं पृच्छति इत्यत्र पुत्रविशेषणत्वेनोपात्त-स्याप्रधानस्य ब्राह्मणस्याप्यनेन कर्मत्वमति प्रसज्यति। न च तस्याकारकत्वान्न कर्मत्वादिति वाच्यम् एवमपि पाणिना कांस्यपात्र्यां दोग्धि इति करणाधिकरणयोर-प्रधानत्वेनाति प्रसंगात्। तयोस्तु दण्डेन हन्ति-इत्यादौ करणस्य, कपाले क्षीरमस्ति इत्यादावधिकरणस्य चास्त्यवकाशः, दुहादिपरिगणनात्।

ततश्च केनाकथितमित्याकाङ्क्षायां भाष्ये अपादानादिविशेषकथाभिः इति यत्समाहितं तदेव वैयाकरणैर्व्याख्यातम् - अपादानसंप्रदानाधिकरणकर्म-करणकर्तृहेतुसंज्ञाविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यादिति। एवञ्चानेन सूत्रेण यस्यार्थस्य कर्मसंज्ञा भवति, सोऽर्थोऽपादानादिविशेषो न भवति, प्रत्युत कारक-सामान्यम्। कारकत्वं ह्यपादानादीनां व्यापकीभूत-मधिकारलब्धञ्च। अत एवेह भाष्योक्तौ विशेषपदं सन्निवेशितम्। ततश्च ब्राह्मणस्य पुत्रं पृच्छति-इत्यादावस्य नातिप्रसंगः, ब्राह्मणस्याकारकत्वात्।

अत्रायं समुदेति प्रश्नः- अनेन सूत्रेण यस्यार्थस्य कर्मसंज्ञा विधीयते, शाब्दबोधे तस्यार्थस्य कर्मत्वेन संबंधित्वेन कारकत्वेन वा केन रूपेण भानमिति? तदस्य समाधाने वैयाकरणानां किल यानि मतान्तराणि विलसन्ति, तानि यथामति क्रमेणेह समुपादीयन्ते-

''पाणिनिमतम्'' - जानन्ति सुधियो यदष्टाध्यायी सूत्रमतिरिच्य पाणिनिमतप्रकाशकमिह नास्ति किमपि वाङ्मयम्। सूत्राणां पुनस्तदेव तात्पर्यं यन्महाभाष्याब्धौ सोपपत्तिकं फणिभाषितम् ''यथोत्तरं मुनीनां प्रामाण्यमि'' ति कस्माच्चिच्छाब्दकृतान्तात्। इत्थञ्च यद्यपि भाष्यमतमेव पाणिनिमतम्, तथाप्यष्टाध्यायीसूत्रं तत्क्रमं चानुलक्ष्य स्वातन्त्र्येण स्वयं किञ्चिदिह विचारणीयम्, तदेव खलु पाणिनिमतमिति समभ्यूहनीयम् तस्य सूत्रमूलकत्वात्।

अष्टाध्यायी-प्रथमाध्याय-चतुर्थपादे कारके (1/4/23) इत्यधिकृतम्[1]। ततः कारकप्रकरणं कारकविशेषनिरूपणमुपक्रान्तम्। तत्रादावपादानं संप्रदानं करणमधिकरणञ्च कारकं यथासंख्यमुत्सर्गापवादसूत्र-जालेन सूक्ष्मेक्षिकया सन्निरूप्य कर्मकारकमुपसूत्रितम्। तदिह कर्मकारके पूर्वसूत्रैर्विधीयमानकर्मसंज्ञकानामा-धाराद्यर्थानां यथा शाब्दबोधे कर्मत्वेन भानं भवति तथेहापि कर्मत्वप्रकारकबोधे कामपि बाधां नैवोत्पश्यामः

प्रत्युत तथाविधबोधाभावे कर्मसंज्ञाविधानमेव निष्फलायते, वदतो व्याघातात्।

यथा संस्कारद्वारा विहितनाम्ना बोधाभावे जातस्य नामकरणं निष्फलम्। किञ्च तत्रापादानादिविशेषस्य विवक्षाभावेऽपि कारकसामान्यं वर्तत एव, कारकाधिकारात्। तथा च तस्य कारकत्वसामान्येन बोधे नास्ति काचिदनुपपत्तिः यथा न ब्राह्मणं हन्यात् इत्यादौ ब्राह्मणत्वसामान्यं भासते। एवञ्च 'अकथितञ्च' इति सूत्रेण विधीयमानकर्मसंज्ञकस्य शाब्दबोधे कर्मत्वेन कारकत्व-सामान्येन वा भानं भवतीति पाणिनिमतमित्यवधारणीयम्।

किञ्चेहाविवक्षापि अपादानं संप्रदानं करणमधिकरणमिति चतुर्भिरिव कारकविशेषैर्वक्तव्या, तेषामेव चतुर्णां पूर्वप्रकान्तत्वात्। अत एवाचार्यैरुदाहरणान्यपि तेषामेवाविवक्षाया दर्शितानि। तथा च कर्मकर्तृहेतु संज्ञाविशेषैरविवक्षितत्वाभिधानमकिञ्चित्करम्। एवञ्च गां दोग्धि पयः इत्यत्र क्षरणरूपफलाश्रयकर्मकत्यजनाश्रयगवीकारकं दोहनम् अथवा पयः कर्मकं गोकर्मकं दोहनमिति बोधः पाणिनिमते खलु युज्जते।

**महाभाष्यमतम्** - सूत्रस्योदाहरणानि परिगणयता भगवता पतञ्जलिना श्लोकितम्-

**दुहियाचिरुधिप्रच्छिभिक्षिचिञामु-**
**पयोगनिमित्तमपूर्वविधौ।**
**ब्रुविशासिगुणेन च यत्सचते**
**तदकीर्तितमाचरितं कविना।।**[2]

इह कारिकायां भाष्यकारेण स्पष्टं प्रतिपादितं यद् दुहादीनां षण्णां धातूनामुपयोगस्य प्रधानकर्मणो यन्निमित्तं तदकथितम् तथा ब्रुविशास्योः गुणेन साधनेन प्रधानकर्मणा यत्सचते संबध्यते तदप्यकथितमिति। अपूर्वविधावित्य-नेन च पूर्वविधिविषये नास्य सूत्रस्य प्रवृत्तिरित्यप्य-भिहितम्। एवञ्चानया भाष्योक्त्या तथ्यत्रयं प्रकाशते - (1) दुहादीनामेव धातूनां प्रयोगे 'अकथितञ्च' इति सूत्रं प्रवर्तते, (2) दुहादीनां कर्मणो यन्निमित्तं तदकथितम्, (3) ब्रुविशास्योर्यत्कर्मसंबंधि तदप्यकथितमिति।

पुनश्चाग्रे इह सूत्रभाष्ये भाष्यकारेणाऽन्येऽपि द्विकर्मकधातवः सन्ति परिगृहीताः। तद्यथा-

**नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च।**
**द्विकर्मकेषु ग्रहणं द्रष्टव्यमिति निश्चयः।।**

तत्र 'गतिबुद्धि' इति ण्यन्तानां ग्रहणात्तेषां प्रयोगे सूत्रमिदं न प्रवर्तते, किन्तु नीवहहृधातूनां योगे दुह्यादिवत्प्रवर्तत एवेति निश्चेयम्।

पूर्वकारिकायामिह स्पष्टमभिहितं यदकथितं कर्म निमित्तं संबन्धि वेति। ततश्च शाब्दबोधे तस्य निमित्तरूपेण संबन्धिरूपेण वा भानं जायत इति भाष्याकूतमवधेयम्। एवञ्च गोनिमित्तं पयः कर्मकं दोहनमिति **शाब्दबोधः**। पुत्रं धर्मं ब्रूते इत्यत्र च पुत्रसंबन्धिधर्मकर्मकं वचनमिति बोधो विवेकेनावगन्तव्यः। तदित्थं भाष्यकारेण संक्षेपेणैवाकथितकर्म संकेतितम् न तु तस्य शब्दबोधे भानप्रकारो विस्तरेण पार्थक्येन वा क्वापि न्यरूपि, परमिह संकेतितमर्थं लक्ष्यकुक्षीकृत्य भाष्यमतं किञ्चित्समभ्यूहितम्, यत् खलु आचार्यान्तरैरपि पश्चात्समीरितम्।

**काशिकादिमतम्** - इह काशिकापदेन वृत्तिकारो वामनोऽभिप्रेतः आदिपदेन च न्यासकारः पदमञ्जरीकारः कैय्यटश्चेति त्रयः संग्राह्याः। तत्रादावेतेषां व्याख्यानमनुक्रमेण निभालनीयम्।

काशिकायां तावत्। अकथितञ्च यत्कारकं तत्कर्मसंज्ञकं भवति। केनाकथितम्? अपादानादिविशेषकथाभिः। परिगणनं कर्त्तव्यम्- दुहियाच्........... आचरितं कविना(3) (म. भा. 1, 334)

उपयुज्यते इत्युपयोगः पयः प्रभृति, तस्य निमित्तं गवादि। तस्योपयुज्यमानपयःप्रभृतिनिमित्तस्य गवादेः कर्मसंज्ञा विधीयते। पाणिना कांस्यपात्र्यां गां दोग्धि पयः। पाण्यादिकमप्युपयोगनिमित्तम्, तस्य कस्मान्न भवति? नैतदस्ति विहिता हि तत्र करणादिसंज्ञा। तदर्थमाह-अपूर्वविधाविति। ब्रुविशासिगुणेन च यत्सचते। ब्रुविशास्योर्गुणः साधनं प्रधानं कर्म धर्मादिकम्, तेन यत्संबद्ध्यते तदकीर्तितमाचरितं कविना तदकथितमुक्तं सूत्रकारेण-इति।

इह हि काशिकाकारेण महाभाष्यकारिकामवलम्ब्य तत्क्रमेणैवाकथितं परिभाषितम्। तदत्र तत् क्वचित् कर्मनिमित्तरूपं क्वचिच्च कर्मसंबंधीति यथाभाष्यं विज्ञेयम्। अतो बोधोऽपि तस्यार्थस्य निमित्तत्वप्रकारकः संबंधप्रकारकश्च यथायोग्यं परिकल्पनीयः।

काशिकाव्याख्यातुर्न्यासकारस्य जिनेन्द्रबुद्धेर्मत-मपि यथाकाशिकं पूर्वोक्तमवगन्तव्यम्। तद्यथा व्याख्यानमस्यावलोकनीयम्-अपादानादिभिर्विशेष-कथाभिरिति। कारकसामान्यकथाया व्यवच्छेदार्थमेतत्। यदि हि केनाप्यकथितस्य कर्मसंज्ञा स्यात्तदा 'माणवकस्य पितरं पन्थानं पृच्छति'' इत्यत्र अकारकस्यापि माणवकस्य कर्मसंज्ञा स्यात्। परिगणनमिति। अन्य धातुव्यवच्छेदार्थमेतत्। उपयुज्यत इत्युपयोग इति कर्मसाधनो घञन्तः। गां दोग्धि पयः इति। ननु चात्र विहितापादानसंज्ञा, अस्ति हि अत्रापायो गोर्दुहेः क्षरणार्थत्वात्, क्षरति गोः क्षीरम्, तद् गोर्धोधा क्षारयति, एवञ्च तत्क्षार्यमाणं ततोऽपक्रामतीति स्पष्ट एवापायः, ततो नेदमुदाहरणमुपपद्यते? नैतदेवम्, सत्यपि हि अपाये नात्र गोरवधित्वं विवक्षितम्, किं तर्हि? क्षीरं प्रति **निमित्तभावमात्रम्**। यद्येवं गोः कारकत्वं न स्यात् यथा ''वृक्षस्य पर्णं पतति'' इत्यत्र वृक्षस्य न, क्षरणक्रियां प्रति निमित्तभावेनाविवक्षितत्वात्, नैतत्, अवधित्वं ह्यत्र गोर्न विवक्षितम् क्षरणं प्रति निमित्तभावस्तु विवक्षित एव। वृक्षस्य पर्णं पततीत्यत्र तु पतनं प्रति वृक्षस्य निमित्तभावमात्रमपि न विवक्षितम् न केवलमवधिभाव इत्यसमानम् इति।

न्यासकारस्यैतावता विस्तरेण व्याख्यानेन निर्गलितं यद् ''गां दोग्धि पयः'' इत्यादौ अकथितं गवादिकं कर्मणो निमित्तत्वप्रकारकः कारकम् न तु तदपादान संबंधरूपं कारकसामान्यं वेति। ततश्च न्यासकारमतेऽप्य-कथितस्य कर्मणो निमित्तप्रकारकः संबन्धत्वप्रकारश्च यथायथं शाब्दबोधोऽनुभावनीयः।

पदमञ्जरीकारो **हरदत्तोऽपि** यथान्यासं-यथायथं निमित्तरूपं संबंधरूपं चाकथितं मनुते। तदुक्तं तेन-तस्य गवादीति। अनेन गां दोग्धि पयः इत्यादौ पयः प्रभृतेरुपयुज्यमानत्वादीप्सिततमत्वम् गवादेस्तु तदर्थ-त्वादपादानस्यानीप्सिततमत्वं च दर्शयति। तथायुक्तत्वा-भावाच्च गवादेस्तथायुक्तमित्यनेनापि न सिद्ध्यति। एतदेव दर्शयति तस्यैनमित्यादि। उपयुज्यमानस्य पयः प्रभृतेर्यन्निमित्तं गवादि तस्येत्यर्थः। पाण्यादिक-मप्युपयोगनिमित्तमिति तेनापि विनोपयोगस्य पयसोऽ-सम्भवात्। तदर्थमाहेति। तस्य करणादेः कर्म संज्ञानिवृत्त्यर्थमित्यर्थः।

अनेन व्याख्यानेन हरदत्तोऽपि पूर्वमतमेवानु-सरति। आचार्यः कैय्यटोऽपि काशिकादिव्याख्यान-मेवानुसरति। तथाहि उपयुज्यत इत्युपयोगः पयः फलादि, तस्य निमित्तं गवादि। अनेन गां दोग्धिः पयः इत्यत्र पयस उपयुज्यमानत्वादीप्सिततमत्वम् गोस्तु पयोऽर्थत्वाद-पादानस्यानीप्सिततमत्वं दर्शयति। तथायुक्तत्वाभावाच्च

गोस्तथायुक्तमित्यनेनापि कर्मसंज्ञा न सिध्यति। ब्रविशास्योर्गुण: साधनं प्रधानकर्म धर्मादिकम्, तेन च यत्सचते संबंद्ध्यत इत्यर्थ:- कैय्यटस्य व्याख्यानेऽस्मिन् न्यासकारहरदत्तादिमतमेव प्रकाशितं भवति।

किञ्च पूर्वाचार्यवाक्यान्यप्यविकलानि कैय्यटेन व्याख्यायामिहोपयोजितानि। एवञ्चैतन्मतेऽपि गोनिमित्तकं पय: कर्मकं दोहनमिति शाब्दबोध:।

**भट्टोजिदीक्षितमतम्** - वाणी-विलासबुधवृन्द-वृन्दारकवन्दनीया दीक्षितास्तु सूत्रस्यास्य सार्थक्याय संबंधरूपमकथितकर्माङ्गीकुर्वन्ति। उपयोगिनिमित्तं चैतन्मते उपयोगसंबन्धीति विज्ञेयम्, संबंधस्यासंख्यात-त्वेन निमित्तनिमित्तिरूपत्वात्। किञ्च भाष्यकारिकायां 'यत्सचते' इत्युक्त्या कर्मसंबंधिनोऽपि ग्रहणमिष्यत एव। ततश्चाकथितकर्मण: संबंधिरूपत्वमपि भाष्य-मूलकमेव। तदुक्तं प्रौढमनोरमायां दीक्षितेन-

परिगणनमिति, तेन नटस्य श्रृणोति[4] इत्यादौ नातिप्रसंग इति भाव:। गां दोग्धीति। गोसंबंधिपय: कर्मकं दोहनमर्थ:। स्यादेतत्, ''कर्तुरीप्सिततमं कर्म'' ''तथायुक्तं चानीप्सितम्'' इति सूत्राभ्यां गतार्थमेतत्, तथाहि- त्यजनोपर्सजनं त्याजनं दुहेरर्थ:। दापनमङ्गी-करणं च याचे:। विक्लेदनं निर्वर्तनं च पचेरित्यादि। एवञ्च धातूपात्तव्यापारविषयीभूतं यत्त्यजनदानाङ्गीकारादि तदाश्रयत्वं गवादीनां स्पष्टमेव। अतएव ह्यणौ कर्तुर्णौ कर्मत्वस्य न्यायसिद्धतया गत्यादिसूत्रं नियमार्थमिति प्राचां सिद्धांत:। अतएव चाकडारसूत्रे अपादानमुत्तराणि गां दोग्धि पय: इत्यत्र परत्वात्कर्मसंज्ञेतिभाष्यं संगच्छते। पञ्चकं प्रतिपदिकार्थ इति पक्षे त्ववधित्वफलाश्रयत्व-योर्युगपद् विवक्षायां चेदम्। अवधिभूता या गौस्तन्निष्ठो य: क्षरणानुकूलव्यापारस्तद्विषयिणी गोपनिष्ठा प्रेरणेत्यर्थ:। तथा च अकथितञ्चेति सूत्रं व्यर्थमिति चेत्, अत्रोच्यते- कर्मण: शेषत्वेन विवक्षायां न माषाणामश्नीयात् इतिवत्षष्ठी प्राप्ता, तां बाधितुमिदं सूत्रम्। तथा चेह षष्ठीवत्सबंधंमात्रं द्वितीयार्थ इति स्थितम्। अपादानत्व-मात्रविवक्षायान्तु पञ्चम्येव। गो: क्षीरविशेषणत्वे तु षष्ठी। तेन गो: पयो दोग्धि इत्यपि प्रयोग: साधुरेव। एवमग्रेऽप्यूह्यम्।

अस्यां दीक्षितव्याख्यायामादौ सूत्रस्य वैयर्थ्यम् ततोऽपादानत्वाद्यविवक्षायां प्राप्तषष्ठीबाधनार्थमस्य सार्थकत्वम्, संबंधस्य द्वितीयार्थत्वेनेह शाब्दबोधे तस्यैव भानमिति च चत्वारोऽप्यंशा यथायथमुपपादिता:। सिद्धान्तकौमुदीप्राचीनव्याख्यायां ज्ञानेन्द्रसरस्वती-विरचिततत्त्वबोधिन्यामपि दीक्षितमतस्यैव समर्थनं सोपपत्तिकं भाष्यानुकूलञ्च प्रदर्शितम्। तथाहि -

गां दोग्धीति। पय:कर्मकं गोसंबंधिदोहनमर्थ: पयोऽत्र मुख्यं कर्म, कर्तुरीप्सिततमत्वात् गौस्तु पयसो निमित्ततामात्रेणोपात्ता, न तु वस्तुसताऽप्यवधिभावेनेत्य-पादानसंज्ञाया अप्रवृत्तेरनेन कर्मसंज्ञिका भवति। तदुक्तं हरदत्तेन यद्यपि गोरवधिभावो विद्यते तथाप्यविवक्षिते तस्मिन्निमित्तमात्रविवक्षायामुदाहरणोपपत्ति:।

अनेन व्याख्यानेनाकथितं निमित्तरूपमेवाङ्गीकृतम्, बोधस्तु संबंधप्रकारक इति विवेकोऽवधारणीय:। यद्यपि दीक्षितमतमिदं प्रत्याख्यातं परवर्तिवैयाकरणैरिह कर्मत्व-बोध: स्थापितस्तथाप्याधुनिकवैयाकरणेषु पण्डित-सभापतिशर्मोपाध्यायप्रभृतय: पुनरेतन्मतं समर्थयन्ति। तथाहि रत्नप्रभाटिप्पण्याम्-

यत्तु शब्दरत्नकारा: शेषत्वेन विवक्षायां प्राप्तां षष्ठीं बाधितुमकथितञ्चेति सूत्रम्, तथा चेह षष्ठीवत्सबंधनमात्रं द्वितीयार्थ: इति मनोरमाखण्डनाय किञ्च कर्तुरित्यपि षष्ठ्यपवाद एव, तदभावे तद्विषयेऽपि षष्ठ्या एव प्राप्ते:।

**शब्दरत्नेऽयमेव विचार इत्थन्निरूपितः**- किञ्च कर्तुरित्यपि षष्ठ्यपवाद एव तदभावे तद्विषयेऽपि षष्ठ्या एव प्राप्तेः अतः षष्ठ्यपवादत्वमात्रेण न संबंधत्वेन बोधकतोचिता। तस्मादत्रापि क्रियाजनकतासमाना-धिकरणकर्मत्वशक्तिमत्त्वेनैव बोध इत्येवोचितम्।

**लघुशब्देन्दुशेखरे तावत्**- केन रूपेण विवक्षेति चेत्कर्मत्वेनेति गृहाण। कारकत्वव्याप्यसंज्ञानां स्वबोध्यार्थे कर्मत्वादिशक्तिमत्त्वमात्रेण बोधोऽपि तथैव। तत्तच्छास्त्राभावे सर्वत्र षष्ठीप्राप्त्या सर्वासां तदपवादत्वेन तदपवादत्वमात्रेण संबंधार्थकत्वं न युक्तम्। अत एव कर्मणि द्वितीया इत्यस्य न वैरूप्यम्। अत एवैतत्सूत्रशेषे भाष्येऽनेनैव सिद्धे आद्यसूत्रद्वयवैयर्थ्यमाशङ्क्योक्ति-मात्रस्येत्यनेन संज्ञायां वारणार्थम् इति सूत्रस्यानव-काशत्वे माणवकादपि पञ्चमी स्यादिति ईप्सिततम-मित्याद्यारब्धव्यमित्युत्तरितम्। एतेन दुहादीनां व्यापार-द्वयार्थकत्वे कर्तुरिति कर्मत्वे तत्त्वेनाविवक्षायामप्यनेन कर्मत्वमिति परास्तम्, वदतो व्याघातात्। अत एव कर्तुरित्यनेन सिद्धिमाश्रित्यास्य वैयर्थ्यं भाष्ये नाशङ्क्यम्।

प्रसङ्गेऽस्मिन् नागेशमतं समर्थयतो[5] वासुदेवदीक्षितस्य बालमनोरमाव्याख्या विलोकनीया, तत्र नूनं पदार्थजातं सारल्येन प्रकाशितम्। यथा- वस्तुतस्तु अपादानत्वादिविशेषरूपेणाविवक्षितम् किन्तु कर्मत्वेनैव विवक्षितमकथितम्। तादृशमपादानादि कर्मसंज्ञकं स्यादित्यर्थः। कारकत्वव्याप्यसंज्ञानां स्व बोध्ये कर्मत्वादिशक्तिमत्त्वबोधकत्वाद् बोधोऽपि तथैव, एवञ्च गां दोग्धि पयः इत्यत्र गोकर्मकं पयःकर्मकं च दोहनमित्येव बोधः।

एवञ्चेह नागेशमतमेवाञ्जसा संक्षेपेण च प्रकटितम्। तदित्थमकथितपदार्थविचारप्रसङ्गेऽस्मिन्निह **चतुर्दशानां** वैयाकरणानां व्याख्यानानि समालोचितानीति द्रष्टव्यम्। पदार्थस्वरूपावधारणात्परं प्रयोजनमनुबन्धाय पृथक्कृत्य प्रस्तूयते।

**सूत्रप्रयोजनम्** - महाभाष्ये सूत्रस्यास्य वैयर्थ्यं क्वापि न दर्शितम् प्रत्युतानेन सूत्रेण 'कर्तुरीप्सिततमं कर्म' 'तथायुक्तम्', इत्यनयोः सूत्रयोर्वैयर्थ्यमाशङ्कितमित्युक्तम् यथा-

**एतेन कर्मसंज्ञा सर्वा सिद्धा भवत्यकथितेन।**
**तत्रेप्सितस्य किं स्यात्प्रयोजनं कर्मसंज्ञायाः।।इति।।**[6]

**इयं शङ्का तत्र श्लोकेनैव समाहिता यथा**
**यत्तु कथितं पुरस्तादीप्सितयुक्तं च तस्य सिद्ध्यर्थम्।**
**ईप्सितमेव तु यत्स्यात्तस्य भविष्यत्यकथितेन।।इति।।**[7]

समाधानेस्मिन् यवेभ्यो गां वारयति इत्यादौ ईप्सितयुक्तस्य गवादेः कर्मसंज्ञाविधानाय कर्तुरीप्सितत-मम् इति विषं भुङ्क्ष्व इत्यादौ अनीप्सितस्य विषादेः कर्मसंज्ञार्थं तथायुक्तम्० इति, ईप्सितस्य कर्मतासिद्धये चेदं सूत्रमावश्यकम्। तत्र वारणार्थानामीप्सितः इत्यपादानं संज्ञाचारितार्थ्याय तदपवादविषयं परित्यज्य सूत्रमिदं प्रवर्तते तथासति नटस्य शृणोति इत्यादौ नटस्य कारकत्वेनातिप्रसङ्गः स्यात्, अतो भाष्ये दुहादीनां धातूनां परिगणनं कृतम्। ततश्च दुहादिष्वीप्सितस्य कर्मसंज्ञा-विधानं सूत्रस्यास्य प्रयोजनम्।

काशिकायां तद्व्याख्याने न्यासे चास्य नैष्फल्यं क्वापि नोक्तम्, प्रत्युत दुहादीनाम्[8] अकथितस्य कर्म-संज्ञाविधानार्थं सूत्रस्यावश्यकत्वमङ्गीकृतं परिगणनफलं च तत्रापि धात्वन्तरव्यवच्छेद इत्युक्तम्, तेन नटस्य शृणोति नाकथितकर्मसंज्ञा भवति।

न्यासव्याख्यायां **पदमञ्जर्यां** हरदत्तेनापि यथान्यासं सूत्रस्य सार्थकत्वं परिगणनस्य व्यावर्त्यञ्च निरूपितम्। तत्र किल दुहादीनां प्रयोगे प्रयोजकव्यापारेणाप्यभानत्व-रूपा कल्पना काचिदभिनवोद्भाविता, यस्य यथावदुल्लेखः कैय्यटेनापि कृतः। यद्यप्यनया कल्पनयेह सूत्रवैयर्थ्यं मनागपि नापादितम्, तथापि दीक्षितनागेशप्रभृतिभि-र्वैयाकरणैरनया सूत्रस्य वैयर्थ्यं साधितम् इत्यवधयेम्। तद्यथा-पदमञ्जर्याम्-

ननु चात्रायमर्थः- गौः पयस्त्यजति, दोग्धा गवा पयस्त्याजयतीति। तत्र प्रयोजकव्यापारेणाप्यभानत्वा-सिद्धा गोः कर्मसंज्ञा। न च वाच्यम्-प्रयोजकत्व-व्यापारेणाप्यमानस्य यदि भवति गत्यर्थादिष्वेवेत्युत्तरसूत्रे नियमादत्र न प्राप्नोति, यथा पचन्तं देवदत्तं प्रयुङ्क्ते पाचयति देवदत्तेन इति, ण्यन्तेष्वेव स नियमः। अयन्तु प्रकृत्यन्तः, नैतदस्ति, तथा ण्यन्तेषु धातुषु क्रिया विशिष्टास्य प्रयुक्तिः प्रतीयते गमयतीति, नैवमत्र निष्क्रियस्यापि गवादेर्दोहननयनादिषु विनियोगात्। तथाहि अदुहानाऽपि गौर्दुह्यते, अगच्छन्तो भारादयो नीयन्ते। तस्माद् दोग्धि इत्येकस्या एव क्रियायाः श्रवणाद् गोपयसोर्भेदेन कर्मत्वं न भवति। णिचि तु सति प्रकृत्यंशस्य प्रत्ययांशस्य च भेदेन द्वे क्रिये वाच्येते इति कर्मभेदोपपत्तिः(9)।

हरदत्तस्य सोऽयम्भावः कैय्यटेन संक्षेपेण सारल्येन चैवं प्रारूपि, यथा,-ननु गां दोग्धि पयः इत्यस्यायमर्थः-गौः पयस्त्यजति, देवदत्तो गवा पयस्त्याजयति। तत्र प्रयोजकव्यापारेणाप्यभानवदिति, गोः कर्मत्वं सिद्धम्, नैतदस्ति, यथा ण्यन्तेषु धातुषु क्रियाविशिष्टः प्रयुज्यत इति प्रतीतिः, नैवमिह, निष्क्रियस्यापि गवादेर्दोहनादिषु विनियोगात्। एवञ्चानया कल्पनया सूत्रस्यास्य वैयर्थ्यं नोपपादितम् प्रत्युत विभागजन्यसंयोगानुकूलव्यापार-मात्रस्य धात्वर्थत्वे गोरवधित्वात्तदविवक्षायामिदमा-वश्यकम् इति भावः।

**प्रौढमनोरमायां** - दीक्षितेन हरदत्तप्रादुर्भावितामिमां कल्पनामाश्रित्य अकथितञ्च इति सूत्रस्य वैयर्थ्यमित्थ-मापादितम्, तथाहि त्यजनोपसर्जनं त्याजनं दुहेरर्थः दापनमङ्गीकरणं च याचेः। विक्लेदनं निर्वर्तनं च पचेरित्यादि। एवञ्च धातूपात्तव्यापारविषयीभूतं यद्यजनदानाङ्गीकारादि तदाश्रयत्वं गवादीनां स्पष्टमेव। तथा च अकथितञ्च इति सूत्रं व्यर्थमिति चेत्, अत्रोच्यते, कर्मणः शेषत्वेन विवक्षायां न माषाणामश्नीयात् इतिवत् षष्ठी प्राप्ता, तां बाधितुमिदं सूत्रम्। एवञ्च दीक्षितमतेन सूत्रमिदं व्यर्थीभूय सदपादत्वाद्यविवक्षायां गां दोग्धि पयः इत्यादौ प्रसक्ता षष्ठी बाध्यते। परिगणनफलं चेह पूर्ववत् नटस्य श‍ृणोति इत्यादावस्यातिप्रसंगवारणं विज्ञेयम्।(10)

**तत्त्वबोधिन्यां** तावत् सूत्रस्य प्रयोजनमित्थमुक्तं गां दोग्धीति। पयःकर्मकं गोसंबन्धिदोहनमर्थः, पयोऽत्र मुख्यं कर्म कर्तुरीप्सिततमत्वात्। गौस्तु पयसो निमित्तमात्रेणेपात्ता, न तु वस्तुसताऽप्यवधिभावेनेत्यपा-दानसंज्ञाया अप्रवृत्तेरनेन कर्मसंज्ञिका भवति।

**नागेशस्तु** प्रदीपोद्द्योते शब्देन्दुशेखरेऽन्यत्रापि अनुवेलमपीददद् यद् दुहादयोऽण्यन्ताः सन्तोऽपि केचन व्यापारद्वयार्थका धातवः सन्ति। तेषां व्यापारद्वयविवक्षायां सूत्रमिदं सर्वथा व्यर्थम्। यथा-अन्तःस्थितद्रवद्द्रव्य-निष्ठविभागानुकूलव्यापारानुकूलव्यापारो दुहेरर्थः। तत्र द्रवद्द्रव्यनिष्ठविभागाश्रयस्य पयसः तदनुकूल-व्यापारक्षमस्य गोश्च कर्तुरित्येव कर्मत्वं सिद्धम्। यदा च

तेषां व्यापारद्वयं न विवक्षितम् पयोनिष्ठविभागानुकूलव्यापारादिरेव धात्वर्थस्तदाऽपादानत्वाद्यविवक्षायामन्येनासिद्धकर्मत्वार्थमिदमावश्यकम्। एवञ्च नागेशदिशा सूत्रमिदं **विवक्षाधीनं** वाच्यम्। इह नागेशमतमनुसरन् वासुदेवदीक्षितोऽपि उक्तवान्-एवञ्च कर्तुर्व्यापारप्रयोज्यक्षरणात्मकविभागविशेषाश्रयत्वाद् गोः पूर्वसूत्रस्याकर्मत्वमस्त्येव इति।

वस्तुतः स्थितस्य गतिश्चिन्तनीयेति न्यायेनेह सूत्रमस्तीति प्रयोजनं तस्य वक्तव्यमिति-कृत्वा नागेशमतेऽस्य प्रयोजनमुक्तम्। वस्तुतस्तु तत्रेदं व्यर्थमेव।

**सिद्धान्तरत्नाकरे** स्वमतेनान्येषाञ्च मतेन सूत्रस्य द्विधा **प्रयोजनं** प्रतिपादितम्। तत्रान्येषां मतेन सूत्रमिदं नियमार्थम्। नियमाकारश्चेहअकथितस्येप्सिततमनिमित्तस्य कारकस्य कर्मसंज्ञा यदि स्यात्तर्हि दुहादिसंबन्धिन एव इति। व्यावर्त्यं चास्य नियमस्यान्तर्भावितण्यर्थतायामपि दुहादिभिन्ने सूत्रमिदं न प्रवर्तते। तेन चैत्रश्चैत्रं करोति इति न प्रयोगः।

रत्नाकरकारः तु सूत्रमिदं विध्यर्थं मनुते। गां दोग्धि पयः इत्यादावुपयोगनिमित्तकस्य गवादेरीप्सिततमद्वेष्योदासीनान्यतमत्वाभावेनाप्राप्तकर्मसंज्ञा विधानात्। एवञ्च दुहादीनाम् अपादनत्वाद्यविवक्षायां कर्मत्वार्थं सूत्रमिदं सफलम्। परिगणितभिन्न धातुसंबन्धीप्सितस्य कर्मसंज्ञाविधानविरहादन्तर्भावितण्यर्थतायां चैत्रेण घटं करोति इत्यादौ तृतीयैव। एवञ्च दुहाभिन्नान्तर्भावितण्यर्था धातवोऽस्य व्यावर्त्या इत्यवधेयम्।

इह शाब्दबोधमुखेन अकथितञ्च इति सूत्रस्यार्थः स्वरूपं प्रयोजनं च वैयाकरणानां मतेन यथामति किञ्चित्प्रदर्शितम्। तत्र वैयाकरणानां प्रायो विचारसाम्येऽपि केचन नवा नवा अर्थास्तत्र तत्र व्याख्यानेषु तेषां भासन्ते येषां तत्तच्छब्दैरेव भूयसा साक्षात्कारसमायोजितः। तत्र मुख्यतः कर्मनिमित्तत्वं कर्मसंबन्धित्वं कर्मत्वञ्चेति त्रीणि स्वरूपाणि अकथितकर्मण इह दर्शितानि अन्येषाञ्च तत्रैव त्रिष्वन्तर्हितत्वात्। सूत्रस्य प्रयोजनं तावत्स्पष्टप्रतिपत्त्यर्थमनुस्यूतमपीह पृथगुपवर्णितम् प्रवृत्तिप्रयोजकत्वात्। इह संज्ञाया अर्थनिबन्धनत्वं द्विकर्मकदुहादिधातुत्वं तेभ्यः कर्मणि प्रत्ययविधानञ्चेत्येते त्रयोऽप्यंशाः सन्त्यनेन संबद्धाः, परमिह ते मनागप्यस्पृष्टा इति द्रष्टव्यमित्यलं पल्लवितेन।

**सन्दर्भाः-**


(1) अष्टाध्यायी प्रथमाध्यायचतुर्थपादे कारके (314/23)

(2) महाभाष्यमतम् (श्लोक संख्या-4)

(3) काशिका (म.भा. 1/334)

(4) भट्टोजिदीक्षित-शब्दरत्नकाराः (पृष्ठ संख्या-45)

(5) रत्नाकरकारकृष्णभट्टमतम्।

(6) नागेशमतम् (लघुशब्देन्दुशेखरे) पृष्ठ संख्या-46)

(7) कर्तुरीप्सिततम्-पाणिनीयम् सूत्रम्-1/4/49/

(8) तथायुक्तम्-पाणिनीयम् सूत्रम्-1/4/50/

(9) पदमञ्जर्यां-हरदत्तेन (पृष्ठ संख्या-67)

(10) प्रौढमनोरमायां दीक्षितेन - पृष्ठ संख्या - 22।



**एसोसिएट प्रोफेसर**

**लक्ष्मीकुमारी बधाला गर्ल्स पी.जी. कॉलेज,**

**गोविन्दगढ़, चौमूं (जयपुरम्)**

**मो.: 9929662525**

# नाटकलक्षणरत्नकोशत उद्धृताः साम्प्रतमनुपलब्धाश्च नाट्यरचनाः

❑ दिव्या शर्मा

बाह्याभ्यन्तरप्रमाणैः नाट्याचार्यस्य सागरनन्दिनः स्थितिकाल एकादशख्रिस्ताब्द्या उत्तरार्धे स्वीक्रियते। सागरनन्दिविरचिते नाटकलक्षणरत्नकोशाख्ये ग्रन्थे नाट्यतत्त्वानामुदाहरणानां विस्तृतं क्षेत्रमस्ति। अत्र अभिज्ञानशाकुन्तलोत्तररामचरितवेणीसंहारस्वप्नवासव-दत्तमृच्छकटिकादिभ्यो लब्धप्रतिष्ठेभ्यो नाट्यप्रबन्धेभ्यो बहून्युदाहरणान्युद्धृतानि सन्ति। एताः सर्वा रचनाः सर्वत्र उपलब्धाः सन्ति, किन्तु तदतिरिक्तमज्ञातेभ्यः सम्प्रति लोकेऽनुपलब्धेभ्यो नाट्यप्रबन्धेभ्यश्चापि बहून्युदाहरणा-नि सङ्गृह्य ग्रन्थकारोऽयं समृद्धसंस्कृतसाहित्यं परिचाययति पाठकान्। वस्तुतो भारतस्य पारतन्त्र्या-दस्माकं विपुलं समृद्धञ्च बहुतरं साहित्यं विविधैः कारणैः विनष्टम्। संस्कृतस्य प्राचीनेषु लक्षणग्रन्थेषु लक्ष्यग्रन्थेषु चोल्लिखिताः बहवो ग्रन्थाः साम्प्रतं सर्वथा लोके अनुपलब्धाः सन्ति।

आचार्योऽयं सागरनन्दी स्वग्रन्थे साम्प्रतमनुपल-ब्धानां पञ्चाशतोऽधिकानां नाट्यरचनानामुल्लेखमकरोत्। तास्वपि अष्टाविंशत्याः नाट्यरचनानां नामानि केवलं नाटकलक्षणरत्नकोश एव मिलन्ति। सागरनन्दिना निर्दिष्टानां सम्प्रत्यनुपलब्धानां चैषां ग्रन्थानां संक्षिप्तः परिचयोऽत्र प्रस्तूयते-

1. **उत्कण्ठितमाधवम्** (काव्यम्) :- काव्यमित्यस्य रूपकस्योदाहरणे अस्य नाट्यप्रबन्धस्य नामोल्लेखः कृतो वर्तते। अस्य रचनाकारोऽज्ञातोऽस्ति।

2. **उर्वशीमर्दनम्** (ईहामृगः) :- ईहामृगस्य विवेचनेऽ-स्य ग्रन्थस्य नामोल्लेखः कृतः। ग्रन्थोऽयमनुपलब्धः प्रणेता चास्याऽज्ञातोऽस्ति।

3. **उषाहरणम्** (नाटकम्) :- नाटकलक्षणरत्नकोशे उषाहरणमित्यस्य नाटकस्य नामोल्लेखो मिलति। अस्य रचनाकारोऽज्ञातो ग्रन्थश्चानुपलब्धः।

4. **कलावती** :- सागरनन्दी भाण-लास्यांगविवेचने नाट्यप्रबन्धस्यास्य तृतीयाङ्कादुद्धरणमेकं प्रस्तुतवान्। किमासीदस्य स्वरूपम् ? कस्तावदस्य प्रणेता ? विषयेऽस्मिन् किमपि नोक्तवान्।

5. **कीचकभीमम्** (नाटकम्) :- नाटकलक्षणरत्नकोशे उल्लिखितैरुदाहरणैरिदं नाटकं ज्ञायते। अस्य रचनाकार अज्ञातः। इदमपि नाटकं सम्प्रति अनुपलब्धमेवास्ति।

6. **कामदत्तापूर्तिः** - निर्वहणसन्धेर्द्युतिप्रभेदे अस्य नामोल्लेखः नाटकलक्षणरत्नकोशे मिलति। अस्य प्रणेता अज्ञातः।

7. **ग्रामेयी** (नाटिका) :- सागरनन्दिनः समये कदाचित् नाटिकेयं प्रसिद्धा आसीत्। अस्या अन्यत्र उल्लेखो न प्राप्यते।

8. **जानकीराघवम्** (नाटकम्) :- अस्मान्नाटकाद् विंशति यावदुदाहरणानि सङ्कलितानि सन्ति नाटक-लक्षणरत्नकोशे। नाटकमिदमनुपलब्धं तस्य प्रणेतृविषये च किमपि नोक्तम्।

9. **तापसवत्सराजः** (नाटकम्)- अस्य प्रणेता मायुराजनामधेयः कश्चन कलचूरिवंशस्य कविरासीत्। षडङ्कात्मकेऽस्मिन् नाटके उदयनवासवदत्तयोः प्रणयकथा चित्रिता वर्तते।

10. **दूताङ्गदम्** - अस्य नाट्यप्रबन्धस्य केवलं नामोल्लेख एव मिलति।

11. **देवीचन्द्रगुप्तम्** (नाटकम्) - अस्यैतिहासिक-नाटकस्य रचयिता विशाखदत्तो विशाखदेवो वा मन्यते। नाटकमिदं ध्रुवाचन्द्रगुप्तयोराख्यानेन निबद्धमस्ति।

12. **नरकवधम्** (नाटकम्) - सागरनन्दिनोद्धृतं नामशेषमेव नाटकमिदमस्ति तद्विषयेऽन्यत् सर्वमज्ञात-मस्ति।

**13. नरकोद्धरणम्** (डिमः) - सागरनन्दी 'षोडश-नायकयुक्तो डिमः' इत्यनेन वचसा नरकोद्धरणम् उद्धृतवान्।

**14. पत्रलेखा** (भाणः)- भाणनामधेयस्य रूपकस्येयं रचना उदाहरणमस्ति। ग्रन्थे अस्य लेखकोऽज्ञातः।

**15. भीमविजयम्**- नाटकलक्षणरत्नकोशे सागरनन्दिना साधकसाधनसाध्यादिपञ्चकविवेचने (53 पृष्ठे) अस्य नाट्यग्रन्थस्य साध्यपञ्चकमुद्घाटितं वर्तते।

**16. मदनमञ्जुला** - मदनमञ्जुला मदनमञ्जुका चेति नामद्वयेन भाणस्याङ्गरूपेण रचनेयं (274 पृष्ठे) उद्धृता वर्तते।

**17. मदनिकाकामुकम्** (रासकम्) - सागरनन्दी रासकनामधेयस्य रूपकस्योदाहरणेऽस्याः रचनायाः उल्लेखमकरोत्। अतोऽधिकं किमपि विवरणमस्य न प्राप्यते।

**18. मायामदालसम्** (नाटकम्) - साध्यादिपञ्चक-विवेचने (49-50 पृष्ठेषु) अस्मान्नाटकाद् बहून्यु-दाहरणानि नाटकलक्षणरत्नकोशे उद्धृतानि सन्ति। नाटकस्य विषये अन्यत् सर्वमज्ञातम्।

**19. रम्भानलकूबरम्** - प्रकृते ग्रन्थे गोत्रस्खलित-नामधेयस्य सन्ध्यन्तरस्योदाहरणेऽस्योल्लेखः कृतो वर्तते। अनुपलब्धस्यास्य ग्रन्थस्य प्रसादगुणसमन्वितशैली आसीत्।

**20. राधा** (वीथी) - वीथ्याः उदाहरणेऽस्य नाट्यग्रन्थ-स्य उल्लेखः सागरनन्दिना कृतः।

**21. रामविक्रमम्** (नाटकम्)- नाट्याचार्यः सागरनन्दी प्रगमनाख्यस्य सन्ध्यङ्गस्योदाहरणं रामविक्रमस्य नाटकस्य द्वितीयाङ्काद् गृहीतवान्।

**22. रेवतीपरिणयम्** - नाटकलक्षणरत्नकोशकारः 'विटतापसविप्राद्यैर्मुनिकञ्चुकिभिस्तथा' इति मातृगुप्ता-चार्योक्तं प्रवेशकस्य लक्षणं प्रदर्श्य 'तत्र रेवतीपरिणये तृतीयेऽङ्के तापसः' इत्यनेनास्य निदर्शनमकरोत्।

**23. शशिकामदत्तम्** - अस्या नाट्यरचनाया अप्युल्लेखो मातृगुप्तोक्तप्रवेशकस्योदाहरणे 'शशिकामदत्ते तृतीये विटः' इत्यत्र मिलति।

**24. वकुलवीथिका** (वीथी)- नाट्यरचनेयं प्रकृते ग्रन्थे वीथीनामकस्य रूपकस्योदाहरणरूपेण निर्दिष्टा वर्तते। अन्यत् सर्वमज्ञातम्।

**25. शक्रानन्दः** (समवकारः)- सागरनन्दी समवकार-स्य रूपकस्योदाहरणे 'शक्रानन्दः' इत्याख्यं नाट्यप्रबन्ध-मलिखत्। नान्यत्र क्वापि ग्रन्थस्यास्योल्लेखोऽभवत्।

**26. शर्मिष्ठापरिणयम्** - नाटकलक्षणरत्नकोशे प्रवर्तक-स्योदाहरणं 'शर्मिष्ठापरिणय' इत्यस्मान्नाट्यप्रबन्धादुद्-धृतमस्ति।'

**27. शशिविलासम्** (प्रहसनम्) - प्रकृते ग्रन्थे शुद्धप्रहसनस्य रूपकस्योदाहरणं 'शशिविलासम्' एतदाख्यं प्रहसनमुक्तम्।

**28. सत्यभामा** (गोष्ठी)- नाटकलक्षणरत्नकोशे ग्रन्थकारो गोष्ठीनामकस्य रूपकस्योदाहरणे 'सत्यभामा' इत्याख्यां रचनामदर्शयत्।

केवलं नाटकलक्षणरत्नकोश एव सङ्कलिता उपर्युक्ता एता नाट्यरचना अज्ञाता अप्रसिद्धा अनुपलब्धाश्च सन्ति अद्यावधि यावल्लोके। अतोऽत्र संस्कृतनाट्यसाहित्यस्य विकसितस्वरूपप्रकाशने सागरनन्दिनो नाटकलक्षणरत्न-कोशस्य महदवदानं स्वीक्रियते नाट्यसाहित्यसमीक्षकैः।

**अनुसन्धात्री, साहित्यविभागः**
**राजकीय-आचार्यसंस्कृतमहाविद्यालयः, बीकानेरम्,**
**ज.रा.रा.सं.वि.वि., जयपुरम्**

**सन्दर्भग्रन्थः-**

(1) श्रीसागरनन्दीप्रणीतः नाटकलक्षणरत्नकोशः, व्याख्या-कारः सम्पादकश्च-श्रीबाबूलालशुक्लः शास्त्री, प्रकाशकः - चौखम्भा संस्कृत सीरीज, वाराणसी संस्करणम्-प्रथमं, वि.सं. 2028 ।

# कन्या-पूजनम्

❑ श्रीमती श्वेता दाधीच

प्रथमसूर्यरश्मिना सह मनीषा अद्य बहु प्रसन्नाऽऽसीत्। सा प्राथम्येन मातृत्वसुखं प्राप्नोत्। सा शीघ्रमतिशीघ्रं सर्वाणि कार्याणि समाप्य चिकित्सालयं प्रति गन्तुमिच्छेत्। यदारभ्य परिवारजनाः एवं विषयं ज्ञातवन्तः तदारभ्य एव सर्वे आनन्दिताः आसन्। श्वश्रूः विशिष्टावसरेऽस्मिन् विभिन्नान् प्रयत्नान् करोति। श्वसुरोऽपि क्रीडनकानि मिष्टान्नमित्यादीन् आनयति अपि च मनीषायाः पतिः तां बाह्वोः स्वीकृत्य अनुभावयति यत् सा एव एतस्य सर्वस्य सुखस्य कारणभूता वर्तते। मनीषा मनसि सुन्दरम् स्वप्नान् वयन्ती चिन्तयन्ती च भवति। कल्पनामात्रेणैव हृदयम् आनन्दपूर्णं भवति। अद्भुत-उर्जायाः च संचारः भवति। श्वश्र्वा आदेशः आसीत् यत्चिकित्सालयं गत्वा पूर्वं परीक्षणं कुर्यात्। सा राहुलेन सह चिकित्सालयं प्राप्य सोनोग्राफी (भ्रूण परीक्षणं/आन्तरिकपरीक्षणं) इति कारितवती। तेन ज्ञातं यत् गर्भेऽस्मिन् कन्याऽऽसीत्। राहुलः सर्वान् सूचितवान् यत् किं स्यात् तदनन्तरं सर्वत्र निस्स्वनं वातावरणमभवत्। मनीषा यदा गृहमागतवती तदा श्वश्रूः उपालम्भेन स्वागतं कृतवती, या एव पूर्वं बहु अवधानेन तस्याः सेवां कुर्वती आसीत् सहसा एव सा वदन्ती अस्ति ''गर्भपातं'' कारयतु इति। प्राथम्येन एव कन्यां जनिष्यते अस्माकं कुलं नश्यतीति बहु किमपि कथयति। श्वसुरोऽपि उच्चैः बहु भाषते। सा स्वपतिमुपगता यत् सः मम स्वामी इति मन्यमाना गतवती परन्तु सोऽपि गर्भपाताय कथयति। एवं च राहुलः मनीषां वदति यत्- अधुना एकस्या अपि सन्ततेः पोषणं कष्टायते चेत् पुत्री भविष्यति तदा कथं सम्भविष्यति पुनश्च वंशवृद्धिः कथं? अतः श्वः चिकित्सालयं गत्वा गर्भपातं कारणीयम् इत्युक्त्वा राहुलः शयनं करोति। मनीषा अन्तर्द्वन्द्वे आसीत्, चिन्तयन्ती आसीत् यत् मम पुत्री कोमलांगी यस्याः हृदयं मया सह बद्धं तां कथं न प्रसविष्ये, पुनश्च एतत् सर्वं श्रुत्वा सा निश्चयेन वदेत् मां न जहि इति। मां मा मारय इति। तस्याः करुणाक्रन्दम् एव सा शृण्वती आसीत् आरात्रि सा शयनं न कृतवती। सा चिन्तारता आसीत् यत् एकपक्षे परिवारः अपरतश्च गर्भे स्थिता कन्या।

प्रातः काले श्वश्रूः आदिशत्- अद्यैव गर्भपातः भवतु इति, अन्यथा मम पुत्रात् दूरे भव इति। सुशिक्षितपरिवारः आसीत् परन्तु मनीषायाः गर्भे बालिका अस्ति इति विज्ञाय सर्वे दुष्टाः क्रूराःअभवन्। कोऽपि गर्भस्थकलिकायाः विषये न चिन्तयति। मनीषा कदाचित् तु नवपल्लवितायाः कलिकायाः विषये प्रेमार्द्रा भवति कदाचित् गर्भपातं न भविष्यति चेत् तस्य परिणामविषये चिन्तयन्ती भयभीता भवति। अस्मिन् एव चिन्तने यदा सा चिकित्सालयं गता तदा मन्ये सा आत्मसमर्पणं कुर्वती स्यात्- हे देवि! अद्य यथा नवरात्रावसरे सर्वत्र घटस्थापना जायमाना वर्तते परन्तु मम गर्भस्थस्य दुर्दशा जायमाना अस्ति। चिकित्सकः सज्जः तत्परः च आसीत्। ममत्वं निवेदयति। परन्तु इत्थं प्रतिभाति यत् सर्वे पाषाणहृदयाः अभवन्। प्रेममूर्तिः राहुलोऽपि क्रोधितः आसीत्। निमेषत्रयम् अवशिष्टमासीत् तदैव मनीषा संकल्पं कृतवती यत्- अलं याचनया। इदानीं न सहिष्ये एतत् सर्वम् तीव्रस्वरेण हुङ्कुरुते-गर्भपातं न कारयिष्यामि इति। पारिवारिकजनाः एतस्याः अवमाननां न असहन्त, परन्तु सा शान्तस्वरूपा दुर्गा इदानीं महाकाली अभूत्। मनीषा दृढ्यति यदद्य सर्वं त्यक्ष्यामि परन्तु गर्भपातं न कारयिष्यामि। मन्ये 'साक्षात् देवी प्रकटिता' इत्थं प्रतीयते। दृढनिश्चयेन शंखनादेन सह कन्यापूजनं जातम्।

वस्तुतः एतत् स्यात् गर्भपातविषये नार्यः महाकाली-रुपाः भवेयुः। प्रत्येकमपि जनः सृष्टिकारणभूतां कन्यां रक्षतु। परिवारे समाजे देशे च कन्यापूजनं भवतु। देवीपूजने कन्यागर्भपातादिषु पूर्णतः प्रतिबन्धः स्यात्। वास्तविकरूपेण तदैव कन्यापूजनं देवीपूजनं च भविष्यति इति भावः

**अध्यापिका**
**रा.उ.प्रा.वि. सबलपुरा, पाली**

# कोरोनासंक्रमणकाले भौतिकोपस्थितिनिषेधकारणतः

## जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयजयपुरस्य शैक्षिकविभागैः ई-संगोष्ठीनाम् आयोजनं कृतम्।

**1. सांस्कृतिकसमारोहः** - फरवरीमासस्य सप्तविंशति-दिनांके राज्यस्तरीयः प्रथमसांस्कृतिकसमारोहः YUV ''**स्पन्दनम्**'' इति समायोजितः। समारोहेऽस्मिन् प्रतियोगितासु राजस्थानराज्यस्य अनेकेभ्यः महा-विद्यालयविश्वविद्यालयेभ्यः समागताः सार्धशताधिकाः छात्राः भागं गृहीतवन्तः। कार्यक्रमस्योद्घाटने मुख्यातिथिरूपेण संस्कृतशिक्षामन्त्रिणः डॉ. सुभाषगर्ग-महोदयाः, कार्यक्रमाध्यक्षाः विश्वविद्यालयस्य कुलपतयः प्रो. अनुलामौर्यमहोदयाः संयोजिका च डॉ. स्नेहलता शर्मा आसन्। डॉ. दिवाकरमिश्रः, डॉ. मधुबालाशर्मा, डॉ. वन्दनाराठौड सहसंयोजकाः आसन्। समारोहकार्यक्रमे राजस्थानसंस्कृतअकादम्याः निदेशकाः श्रीसंजयझाला महोदयाः विशिष्टातिथिरूपेण विजेतृभ्यः पुरस्कारान् प्रदत्तवन्तः।

**2. वेदविभागः** - मईमासस्य चतुर्दशदिनांके 'वेदार्थे वेदाङ्गानां महत्त्वम्' इत्यस्मिन् विषये राष्ट्रिय-ई-संगोष्ठी आयोजिता। कार्यक्रमेऽस्मिन् पञ्चदश प्रख्याताः विद्वांसः व्याख्यानं कृतवन्तः। प्रो. के. साम्बशिवमूर्तिः कुलपतिप्रतिनिधिभूतः विदुषां स्वागतभाषणपूर्वकं तैत्तिरीयशाखायाः मन्त्रानुपदिदेश। प्रो. उमेशदासमहोदयः वेदाङ्गेषु कल्पशास्त्रस्यावदानविषये गभीरं मतं प्रकटितवान्। वैश्विकमहामारीविषये रोगनिवारणोपाये च देहलीतः केन्द्रियसंस्कृतविश्व-विद्यालयस्य प्रो. सुन्दर-नारायणझामहोदयः वैदिक-संहितायाः अनेकानि उद्धरणानि ददौ। प्रो. हरस्वरूपवशिष्ठमहोदयः वेदार्थे व्याकरणस्य प्राथम्यं साधयन् महाभाष्यस्य प्रमाणनिदर्शनं प्रतिपादितवान्। डॉ. नारायणहोस्मने, देवेन्द्रकुमारशर्मा, स्वविचारान् प्रकटितवन्तौ। कार्यक्रमस्य संयोजकः वेदविभागाध्यक्षः डॉ. शम्भुकुमारझा कात्यायनस्य पक्षं प्रस्तुतवान्। प्रायेण: 200 जनाः अत्र पञ्जीभूताः आसन्।

**3. साहित्यविभागः** - मईमासस्य षोडशदिनाङ्के ''शब्दवृत्तिविमर्शः'' इति शीर्षके राष्ट्रिया ई सङ्गोष्ठी (National Webinar) आयोजिता। आयोजने शताधिकाः प्रतिभागिनोऽन्तर्जालमाध्यमेन सन्निहिता आसन्। प्रो. रमाकान्तपाण्डेयः, केन्द्रीयसंस्कृतविश्व-विद्यालयस्य जयपुरपरिसरात्, डॉ. सुभाषशर्मा, ज. रा. राजस्थान-संस्कृतविश्वविद्यालयात्, प्रो. सतीश कपूरः, केन्द्रीय-संस्कृतविश्वविद्यालयस्य जम्मूपरिसरात्, डॉ. अनमोलशर्मा च राष्ट्रियसंस्कृविश्वविद्यालयात् दिल्लीस्थात् समुपस्थाय विशिष्टैः व्याख्यानैः उपकृतवन्तः। कार्यक्रमाध्यक्षाः प्रो. अनुलामौर्यमहोदयाः कुलपतयः, शब्दार्थसम्बन्धविषये कोविड-19 तः उचित-रक्षोपायानुष्ठाने च सम्यक् समुद्बोधयन्। डॉ. स्नेहलता-शर्ममहोदयया, साहित्यविभागे सहायकाचार्यया सर्वेषां धन्यवादो ज्ञापितः। अस्यायोजनस्य संयोजकः उमेशनेपालः आसीत्।

**4. दर्शनविभागः** - मई मासस्य चतुर्विंशतिदिनाङ्के ''विशिष्टाद्वैतदर्शनम्'' इति विषयमधिकृत्य राष्ट्रिया ई-संगोष्ठी (वेबीनार) आयोजिता। संगोष्ठ्यां सम्पूर्णानन्द-संस्कृतविश्वविद्यालयस्य आचार्यः प्रो. रामकिशोर त्रिपाठीवर्यः विशिष्टवक्ता आसीत्।

अन्य व्याख्यानकर्तृषु वाराणसीतः प्रो. ब्रजकिशोर-त्रिपाठीवर्यः, वृन्दावनतः डॉ. अनिलानन्दमहाभागः, जयपुरतः डॉ. उमेशनेपालवर्यः, कोलकातातः डॉ. राजेश्वरी द्विवेदी महाभागाः च आसन्। डॉ. रामेश्वरनाथद्विवेदी अस्य कार्यक्रमस्य संयोजकः आसीत्। श्रीमहेशशर्मा धन्यवादज्ञापनं कृतवान्।

**5. अम्बेडकर -अध्ययनकेन्द्रम्**- 16 मई 2020 दिनाङ्के ''Recalling Dr. Ambedkar during Covid-19 Crisis'' इति विषये एका अन्ताराष्ट्रिया ई सङ्गोष्ठी आयोजिता। केन्द्रस्य संयोजकेन उमेशनेपालेन सञ्चालिते अस्मिन् कार्यक्रमे आध्यक्ष्यं विश्वविद्यालयस्य कुलपतिभिः प्रो. अनुलामौर्यमहोदयाभिः निरूढम्। मुख्यवक्तारः आसन् प्रो. डॉ. राहुलमुखर्जी, हीडल्बर्ग विश्वःविद्यालयः जर्मनी, प्रो. सुषमा यादव, कुलपतिः, भगतफूलसिंह महिलाविश्वविद्यालयः सोनीपत्तनम्, प्रो. जी.के. अरोरा, प्रधानाचार्यः, डॉ. भीमराव-अम्बेडकरमहाविद्यालयः, नवदेहली, डॉ. सुभाषशर्मा धन्यवादज्ञापनम् अकरोत्।

**6. महिला-अध्ययनकेन्द्रम्** - मईमास्य सप्तविंशति-दिनांके ''Gender Issues, Concerns Obstacles and Remedies in achieving Equality in Present Scenario'' इति विषयमधिकृत्य एका अन्ताराष्ट्रियां ई-कान्फ्रेन्स समायोजिता। महिला-अध्ययन-केन्द्रस्य संयोजिका डॉ. स्नेहलताशर्मा स्वागतभाषणम् अकरोत्। आध्यक्ष्यं विश्वविद्यालयस्य कुलपतयः प्रो. अनुलामौर्यमहोदयाः निरूढवत्यः। मुख्यातिथयः आसन् प्रो. शशिप्रभाकुमार-महोदयाः, संकायाध्यक्षाः श्रीशंकराचार्यसंस्कृत-महाविद्यालयः भारतीयविद्याभवनम्, नई दिल्ली। मुख्यवक्तृरूपेण आसीत् प्रो. आशामुखर्जी, शान्ति-निकेतनम्, पश्चिमबंगः। डॉ. स्मिता इक्का, न्यूयार्कतः, डॉ. भावना अग्निहोत्री अमरीकातः, प्रो. सैय्यद तनवीर नसरीन, पश्चिमबंगतः वक्तारः आसन्। साहित्यविभागस्य सहायकाचार्या डॉ. मधुबाला शर्मा धन्यवादज्ञापनं कृतवती। सप्तशताधिकाः प्रतिभागिनः पञ्जीकरणं कारितवन्तः संगोष्ठ्याम्।

**- डॉ. स्नेहलताशर्मा**

**7. गान्धि-अध्ययनकेन्द्रम्** - ''वर्तमानपरिप्रेक्ष्ये महात्मगान्धिनः वैश्विकदृष्टिकोणः'' इति विषयमधिकृत्य 30.05.2020 दिनाङ्के राष्ट्रियवेबीनार आयोजिता। कार्यक्रमस्य अध्यक्षः कुलपतिः डॉ. अनुलामौर्यमहोदया आसीत्। मुख्यातिथिः प्रोफेसर श्रीकृष्णशर्मा अवोचत् यद् गान्धिनः व्यक्तित्वे संस्कृतवाङ्मये निहितानां शाश्वत-मूल्यानां प्रतिबिम्बः परिलक्ष्यते। विश्वविद्यालयकार्य-परिषत्सदस्यः प्रो. रामकिशोरशास्त्री, प्रो. रमेशचन्द्र भारद्वाजः, प्रो. गोपीनाथशर्मा अपि स्वविचारान् प्रास्तुवन्। केन्द्रसंयोजकः डॉ. सुभाषशर्मा, डॉ. के. साम्बशिवमूर्ति अपि उपस्थितौ आस्ताम्। कार्यक्रम-समन्वयकः सञ्चालकश्च डॉ. कुलदीपसिंह आसीत्।

**- डॉ. कुलदीपसिंहः**

संस्कृत-समाचाराः

# राजकीयमहाराज आचार्यसंस्कृतमहाविद्यालयद्वारा समायोजिताः विविधाः वेबिनाराः

महाविद्यालयस्य प्राचार्याणां डॉ. भास्करशर्मा 'श्रोत्रिय' महोदयानां निर्देशने, यू.जी.सी. प्रभारी प्रो. शालिनीसक्सेनामहोदयायाः समन्वये च राष्ट्रिय-अन्ताराष्ट्रियवेबिनारकार्यक्रमाणामायोजनं विहितम्। काव्यधारायूट्यूबचैनलद्वारा अन्ताराष्ट्रियकविसम्मेलनं समायोजितम्। अस्य संयोजनं महाविद्यालयस्य हिन्दीविभागद्वारा अभवत्।

(1) मईमासस्य चतुर्विंशतिदिनांके 'वैश्विकपरिदृश्ये कोरोनायाः प्रभावः' इति विषयमधिकृत्य अन्ताराष्ट्रिय-वेबिनार आयोजिता। कार्यक्रमस्य मुख्यातिथिः संस्कृतशिक्षानिदेशकः डॉ. दीरघरामरामस्नेही आसीत्, प्रवाचकेषु प्रो. एन. एम. शर्मा, डॉ. उर्मिल तलवार, काठमाण्डुस्थानतः डा. प्रियंवदाम्बा काफले, श्री नमामिशंकरबिस्सा, डॉ. सीमा जैन, अनन्ता माथुर प्रभृतय आसन्। कार्यक्रमस्य संयोजनं प्रो. शालिनी सक्सेना सहसंयोजनं च डॉ. सीमा जैन कृतवत्यौ।

(2) मईमासस्य पंचविंशतितमे दिनाङ्के ''ज्योतिषं कर्मकाण्डश्च'' इति विषयमधिकृत्य अन्ताराष्ट्रिय-वेबिनार आयोजिता। कार्यक्रमस्य संयोजकौ डॉ. आलोकशर्मा डॉ. हंसराजशर्मा चास्ताम्। मुख्यातिथिः नवदिल्लीतः डॉ. प्रेमकुमारशर्मा आसीत् प्रवाचकाः जम्मूकेन्द्रीयसंस्कृतविश्वविद्यालस्य निदेशकः प्रो. वासुदेवशर्मा, काठमाण्डु-स्थानतः डॉ. प्रियंवदाम्बा काफले, पं. अखिलेशशर्मा, पं. विजयकुमारशर्मा (वाराणासीतः) डॉ. विवेकशर्मा (U.K.) प्रभृतयः ज्योतिर्विदः कर्मकाण्डविदश्चासन्। प्राचार्येण डॉ. भास्करशर्मणा स्वागतं कृतम्। परिचयं प्रो. शालिनी-सक्सेना प्रदत्तवती संचालनञ्च डॉ. रविशर्मा कृतवान्।

(3) जूनमासस्य षष्ठे दिनाङ्के 'NAAC ASSESSMENT IN HIGHER EDUCATION & SANSKRIT EDUCATION; PROSPECTS' इति विषयमधिकृत्य राष्ट्रियवेबिनारकार्यकमः सम्पन्नः। अस्मिन् कार्यक्रमे राजस्थानसर्वकारस्य संस्कृतशिक्षायाः विशिष्टशासनसचिवः श्रीप्रदीपबोरडः, मुख्यातिथिरूपेण उद्बोधनं कृतवान्। जयपुरकेन्द्रीयसंस्कृतविश्व-विद्यालयतः प्रो. रमाकान्तपाण्डेयः, रुसाप्रकोष्ठस्य संयुक्तनिदेशकः डॉ. विमलेशसोनी, प्रोजेक्टनिदेशिका डॉ. श्रुतिगुप्ताप्रभृतयः विद्वान्सः मार्गदर्शनं कृतवन्तः।

(4) जूनमासस्य अष्टमदिनाङ्के हिन्दीविभागद्वारा 'भक्तिकाल तथा मीराबाई' इति विषयमधिकृत्य राष्ट्रियवेबिनार कार्यक्रमः सम्पन्नः। कार्यक्रमस्य मुख्यवक्तृरूपेण कनोडियामहाविद्यालयस्य सहायकाचार्यः डॉ. शीताभशर्मा आसीत्। डॉ. सत्यदेव-सिंहचौहानः, किशनगढराजकीयमहाविद्यालयस्य पूर्वाचार्यः डॉ. कृष्णवीरसिंहचौहानः, पौद्दार-महाविद्यालयस्य सहायकाचार्यः डॉ. गौरवअग्रवालः, कवयित्री डॉ. आशाशर्माप्रभृतयः विद्वान्सः प्रमुखाः आसन्। महाविद्यालयस्य हिन्दीविभागाध्यक्षा डॉ.

इन्दिराखत्री सर्वेषां स्वागतं कृतवती, कार्यक्रमस्य परिचयं च उपस्थापितवती।

(5) जूनमासस्य नवमदिनाङ्के वेदविभागेन ''वेदेषु विश्वबन्धुत्वस्य भावना'' इति विषयमधिकृत्य राष्ट्रियवेबिनार आयोजिता मुख्यवक्तृषु गोरखपुरविश्व-विद्यालयत: प्रो. मुरलीमनोहरपाठक:, कोलहान-विश्वविद्यालयझारखण्डस्य कुलपति: प्रो. गंगाधरपण्डा, गुरुकुलकांगडीविश्वविद्यालयहरिद्वारत: प्रो . रूपकिशोर -शास्त्री, श्रीलालबहादुरसंस्कतविश्वविद्यालयदिल्लीत: डॉ. देवेन्द्रमिश्र:, जगद्गुरुरामानन्दाचार्यराजस्थान-संस्कृतविश्वविद्यालयत: डॉ. शम्भुकुमारझा आसन्। महाविद्यालयस्य प्राचार्येण डॉ. भास्करशर्मणा सर्वेषां स्वागतं कृतम्। वेदविभागीयाचार्यौ डॉ. शम्भुनाथमिश्र:, डॉ. द्विजेन्द्रनाथमिश्रश्च संयोजनं कृतवन्तौ। डॉ. उमेशदास अतिथीनां परिचयं कारितवान्।

(6) जूनमासस्य एकादशदिनाङ्के साहित्यविभाग द्वारा ''संस्कृतवाङ्मये सामाजिकसमरसता'' इति विषयमधिकृत्य राष्ट्रियवेबिनार आयोजिता। कार्यक्रमे अध्यक्षीयोद्बोधनं विक्रमविश्वविद्यालयकुलपति: प्रो. बालकृष्णशर्मा कृतवान्। मुख्यवक्ता राष्ट्रपतिसम्मानित-मनीषी प्रो. केदारनाथशर्मा आसीत्। विशिष्टवक्तृषु राजस्थानविश्वविद्यालयस्य पूर्वविभागाध्यक्षा प्रो. लक्ष्मी: शर्मा, राजस्थानसंस्कृतअकादम्या: अध्यक्षचर: प्रो. सुषमासिंघवी, जम्बूकेन्द्रीयसंस्कृतविश्वविद्यालयस्य साहित्यविभागाध्यक्ष: प्रो. सतीशकपूर, राजस्थान-संस्कृतनिदेशालयस्य पूर्वनिदेशक: प्रो. सुरेन्द्रकुमारशर्मा, राजकीयधूलेश्वरआचार्यसंस्कृतमहाविद्यालयत: प्रो. सत्यनारायणशर्मा, जगद्गुरुरामानन्दाचार्यराजस्थान-संस्कृतविश्वविद्यालयत: डॉ. उमेशनेपाल: आसन्। कार्यक्रमस्य परिचयं प्रो. शालिनीसक्सेना कारितवती। मंगलाचरणं शैलेशकुमारजैमन: प्रस्तुतवान्। आभार-प्रदर्शनञ्च साहित्यविभागाध्यक्ष: जितेन्द्रकुमारअग्रवाल: कृतवान्।

(7) जूनमासस्य षोडशतारिकायां व्याकरणविभागद्वारा ''व्याकरणशास्त्रे अपादानविचार:'', इति विषयमधि-कृत्य राष्ट्रियवेबिनार आयोजिता। मुख्यवक्तृरूपेण श्रीलालबहादुरसंस्कृतविश्वविद्यालयदिल्लीत: जयकान्त-सिंह: आसीत्। विशिष्टोद्बोधनम् अध्यक्षीयोद्बोधनञ्च जयपुरकेन्द्रीयसंस्कृतविश्वविद्यालयव्याकरणविभागस्य आचार्य: प्रो. श्रीधरमिश्र:, जगद्गुरुरामानन्दाचार्य-राजस्थानसंस्कृतविश्वविद्यालयस्य अनुसंधानविभागस्य निदेशक: प्रो. राजधरमिश्र: कृतवन्तौ। सारस्वतातिथि वाराणसीत: प्रो. भवच्छरणशुक्ल: नवदिल्लीत: प्रो. रामसलाहीद्विवेदी चास्ताम्। संचालनं प्रो. शालिनी-सक्सेना कृतवती। प्राचार्य: डॉ. भास्करशर्मा स्वागतं कृतवान्। आभारप्रदर्शनञ्च व्याकरणविभागाध्यक्षा डॉ. शीलाचौबीसा कृतवती।

(8) जूनमासस्य सप्तदशतारिकायां ''भाषाविज्ञान-व्याकरणयो: परस्परसम्बन्ध:'' इति विषयमधिकृत्य राष्ट्रियवेबिनार आयोजिता। अस्मिन् कार्यक्रमे जयपुरकेन्द्रीयसंस्कृतविश्वविद्यालयस्य निदेशक: प्रो. अर्कनाथचौधरी, वाराणसीत: रामनारायणद्विवेदी, शैलेन्द्रपाण्डेय:, प्रो. लक्ष्मीशर्मा, डॉ. प्रमोदशर्मा, डॉ. रमाकान्तपाण्डेयप्रभृतय: विषयोपस्थापनं मार्गदर्शनञ्च

कृतवन्तः। आभार प्रदर्शनञ्च व्याकरणविभागाध्यक्षा डॉ. शीलाचौबीसा कृतवती। डॉ. द्विजेन्द्रनाथमिश्रेण मंगलाचरणं प्रस्तुतम्।

(9) जूनमासस्य अष्टादशदिनाङ्के भाषाविज्ञान-संस्कृतवाङ्मयविभागद्वारा ''समकालीन साहित्य एवं संस्कृति'' इति विषयमधिकृत्य राष्ट्रियवेबिनार आयोजिता। प्रमुखवक्तृषु दिल्ली-विश्वविद्यालयतः डॉ. मीराद्विवेदी, मोहनलालसुखाडिया विश्वविद्यालयतः प्रो. नीरजशर्मा, जे. एस. पटेल महाविद्यालयतः डॉ. मीनाक्षीजोशी चासन्। अत्र सारस्वतातिथिरूपेण हिस्लोपकॉलेजनागपुरतः डॉ. सुपन्था, बनारस हिन्दूविश्वविद्यालयतः डॉ. फिरोजश्च आस्ताम्। विदुषां स्वागतं प्राचार्यमहोदयः कृतवान्। मङ्लाचरणं डॉ. शम्भूनाथझा कृतवान्। वेबिनारपरिचयं डॉ. सीमाजैन दत्तवती। आभारप्रदर्शनञ्च प्रो. शालिनीसक्सेना कृतवती।

कार्यक्रमैः छात्राः जिज्ञासवश्च लाभान्विताः संजाताः।

**प्रस्तोतारौ**

**( डॉ. द्विजेन्द्रनाथमिश्रः, डॉ. शम्भूनाथझाः )**

---

# संस्कृतभारती ( जयपुरप्रान्तः )

कोरोना सङ्क्रमणावधौ गृहसंरोधनकाले मईमासे संस्कृतभारतीजयपुरप्रान्तेन ''**सत्कथामन्दाकिनी**'' इति नूतनः कार्यक्रमः सम्पादितः। प्रतिदिनं एकः पूर्वनिर्धारितः विद्वान् रात्रौ अष्टवादने मुखपटलमाध्यमेन (फेसबुक लाइव इति) एकस्य महापुरुषस्य कथां श्रावयतिस्म। एताः कथाः वेद-उपनिषद्-पुराण-महाकाव्य-लौकिकसाहित्यादिभ्यः स्वीकृता आसन्। प्रतिदिनं पूर्वस्मिन् दिवसे एकः कार्यकर्ता कथाकारस्य परिचयमपि कारयतिस्म। कार्यक्रमस्य निर्देशकः डॉ. पवनव्यासः, संयोजकः तन्त्रसहायकश्च डॉ. घनश्यामहरदेनिया, कथाकारसमन्वयकः डॉ. रघुवीरप्रसादः प्रचारफलकनिर्माता च डॉ. दीपकः सुश्रीशैलीप्रकाश आसन्। मध्ये यदा-कदा अपराह्ने चतुर्वादने विदुषां व्याख्यानानि अपि अभवन्।

**संभाषणशिविराणि** - मईजूनमासयोः त्रीणि संस्कृतसंभाषणशिविराणि अपि अन्तर्जालमाध्यमेन आयोजितानि। शिविरेषु प्रायशः उपशतं जनाः भागं गृहीतवन्तः, एकस्य शिविरस्य संयोजनं प्रान्ताध्यक्षः श्री हरिशङ्करभारद्वाजः कृतवान्। अस्मिन् शिविरे 27 प्रशासनिकाधिकारिणः सकुटुम्बं शिविरार्थिन आसन्। शिविरेषु चित्रफलकमाध्यमेन संभाषणबिन्दूनां पाठनम् अभ्यासञ्च कारितवन्तः शिक्षकाः। प्रशिक्षकः मार्गदर्शकश्च डॉ. रघुवीरप्रसादः आसीत्, शिक्षकः शुभम आसीत्। प्रचारकार्यं डॉ. घनश्यामहरदेनिया कृतवान्। शिविरे प्रतिदिनं 15 निमेषेषु डॉ. पवनव्यासः श्रीमद्भगवद्गीतायाः विशिष्टश्लोकानां भावं बोधयतिस्म।

**डॉ. घनश्यामहरदेनिया**

संस्कृत-समाचाराः

# राजकीय शास्त्री संस्कृतमहाविद्यालयः, महापुरा द्वारा आयोजितः अंताराष्ट्रियः वेबीनारः

आधुनिकयुगे संस्कृतशिक्षणं प्रभावपूर्णं सर्वजनोपकारकं विधातुं सूचनासंप्रेषणप्रौद्योगिकी कथम् उपयुक्ता भविष्यतीति विषयमाश्रित्य ऑनलाइन अन्ताराष्ट्रिय वेबीनारकार्यशालायाः आयोजनं राजस्थानप्रान्तस्य राजधान्याः जयपुरस्य समीपस्थे राजकीयशास्त्री-संस्कृतमहाविद्यालये महापुरानामके ग्रामे 20 जून 2020 शनिवासरे मध्याह्नेऽभवत्। संस्थायाः प्राचार्यः श्री अरुणकुमारजैनस्य The Role of ICT In Keeping Sanskrit Teaching Alive.

(संस्कृत शिक्षण को जीवंत एवं प्रभावी बनाने में सूचना संप्रेषण प्रौद्योगिकी की भूमिका) इति विषयमाश्रित्य ऑनलाईन अंताराष्ट्रिय वेबीनार कार्यशालायाः सफलतापूर्वकमायोजनं कृतवान्। अस्य कार्यक्रमस्य अध्यक्षा प्रो. सुधारानी पाण्डेयः पूर्वकुलपतिः उत्तराखंडसंस्कृतविश्वविद्यालयः देहरादून आसीत्। प्रो. पाण्डेयमहोदया स्वकीये उद्बोधने उक्तवती यत् वर्तमानकालीनपरिस्थितिषु संस्कृतशिक्षणं प्राणप्रदं प्रभावोत्पादकं च विधातुं सूचना-संप्रेषणप्रौद्योगिकी (ICT) इत्यस्य महती भूमिका विद्यते। संस्कृतशिक्षणसंस्थानेषु दिनानुदिनं नामांकनं न्यूनं जायते। संस्कृतशिक्षणं प्रति छात्राणामरुचिः सर्वत्र दरीदृश्यते। न केवलं एकैकस्मिन् प्रान्ते न च भारतवर्षे अपितु अखिलसंस्कृतविश्वस्य कृते इयं चिन्ता सततं वर्धमाना दृश्यते। अस्याः चिन्तायाः निराकरणार्थ संस्कृतशिक्षणं सूचनासंप्रेषणप्रौद्योगिकी (ICT) इत्यनेन सह संयोज्य रुचिकरं प्रभावपूर्णं च निर्मातव्यम्।

मुख्यातिथिः प्रमुखवक्त्री च प्रो. एंटोनिया रुपेल संस्कृतभाषाविज्ञानविभागः, ऑक्सफोर्ड विश्वविद्यालयः यू.के. आसीत्। स्वकीये वक्तव्ये सा उक्तवती यत् वयं ऑनलाईनमाध्यमेन संस्कृतपाठ्यक्रमं कथं सर्वजनोपयोगिनं कर्तुं शक्नुमः। वयं आई.सी.टी. इति नामधेयाम् आधुनिकशिक्षणपद्धतिमङ्गीकृत्य संस्कृतपाठ्यक्रमम् ऑनलाईनमाध्यमेन छात्राणां समक्षं सरलतया प्रेषयितुं शक्नुमः। अनया पद्धत्या नूनमेव संस्कृतभाषा संस्कृतशिक्षणञ्च अभिवृद्धिः प्राप्स्यति, एवञ्च संस्कृतशिक्षणं प्रति अध्येतृभिः सह जनसामान्येष्वपि अभिरुचिः भविष्यति। सा मौखिकाध्ययनेन सह लिखिताध्ययनमपि अतीवमहत्त्वपूर्णं विद्यते इति स्पष्टतया उक्तवती। साम्प्रतम् ऑनलाईन संस्कृत पाठ्यक्रमस्य सार्थक आश्चर्यजनकश्च परिणामः सर्वत्र दरीदृश्यते। अधुना जर्मनीस्पेनयूकेप्रभृतिषु देशेषु छात्राः ऑनलाईनमाध्यमेन संस्कृतपाठ्यक्रमाधारीकृत्य संस्कृतभाषायां शिक्षणं प्राप्नुवन्ति।

कार्यक्रमेऽस्मिन् अतिथिरूपेण समुपस्थितौ प्रो. के. भारतभूषणः विभागाध्यक्षः, शिक्षाविभागः श्री लाल बहादुर शास्त्री केन्द्रीयसंस्कृतविश्वविद्यालयः नई दिल्ली तथा डॉ. प्रशान्त धर्माधिकारी प्रो. आंग्लभाषा मल्टीमीडिया एण्ड मास कम्युनिकेशन विभागः, जोशी बेडेकर कॉलेज, मुम्बई आस्ताम्। इमौ अतिथी स्व-स्व वक्तव्ये संस्कृतभाषायाः शिक्षणार्थम् ई-शिक्षण उपकरणानामुपरि विशेषबलं प्रदत्तवन्तौ। पावरपॉइंट

प्रेजेंटेशन (PPT) माध्यमेन डॉ. प्रशान्त महोदयेन संस्कृतप्रशिक्षणस्य सरला पद्धतिः अस्माकं पुरतः उपस्थापिता। अस्मिन् वेबीनारकार्यक्रमे भारतवर्षेण सहैव यू.के., स्पेन, जर्मनी देशेभ्यः 450 प्राध्यापकाः शोधच्छात्राः अध्येतारश्च भागं गृहीतवन्तः। प्रतिभागिभिः प्राप्तां प्रतिक्रियामनुभूय निश्चप्रचं वक्तुं शक्यते यत् एषः वेबीनार कार्यक्रमः अतीव ज्ञानवर्धकः जीवनोपयोगी च आसीत्।

कार्यक्रमस्य संचालनं संस्थायाः आंग्लभाषा विभागाध्यक्षा डॉ. अनुपमा रजौरिया कृतवती। कार्यक्रमस्यावसाने धन्यवादज्ञापनं संस्थायाः प्रभारी-प्राचार्य डॉ. जयप्रकाशमिश्र अकरोत्।

**डॉ. महेशकुमारः शर्मा**
**व्याकरणप्राध्यापकः**

---

# निवेदन

**भारती पत्रिका कार्यालय अपने आदरणीय ग्राहकों तक प्रतिमाह समय पर पत्रिका पहुँचाने की व्यवस्था सुनिश्चित करना चाहता है। इस दृष्टि से सभी ग्राहकों से निवेदन है कि निम्नानुसार अपनी सूचनाएं कार्यालय को पोस्ट कार्ड द्वारा अथवा इसी पत्र को काट कर लिफाफे में कार्यालय के पते पर भेजने का श्रम करें। यदि उक्त प्रकार से सूचना भेजने में कठिनाई हो तो मोबाइल नं.– 09352030291 / 8947055999 पर सूचना लिखवा सकते हैं अथवा SMS भी कर सकते हैं।**

नाम.................................................................................

पुत्र/पुत्री श्री.................................................... भवन संख्या.............................

गली/ मोहल्ला/कॉलोनी.................................................................

वाया/पोस्ट ऑफिस.....................................................................

तहसील...................................................... जिला........................................

राज्य....................................................... देश...........................................

पिन.........................................दूरभाष.....................................................

मोबाईल नं..........................................................................

ईमेल................................................................................

निवेदक

**सुदामा शर्मा**, प्रबन्ध सम्पादक
**भारती संस्कृत मास पत्रिका**
बी–15, भारती भवन, न्यू कॉलोनी, जयपुर–302001 (राज.)
दूरभाष–2379014
ई–मेल – sanskritbharti09@gmail.com

# अस्माकं गुरवः

( गताङ्कादग्रे )

❑ वेणीमाधव गो. धर्माधिकारी

**पूर्वसङ्केत :-**

मईमासे नागपुरे तृतीयवर्षस्य संघशिक्षावर्गः प्रचलन्नासीत्। श्री गुरुमहाभागानां वर्गे आगमनम-संभवमेवासीत्। अस्मात्कारणात्तेषां बलवदिच्छानु-रूपमेव प्रान्तानुसारं वर्गे समागतान् स्वयंसेवका-नाह्वयितुं कार्यक्रमो निर्धारितः। तत्र परिचयानन्तरं स्वयंसेवकेभ्यो मनःपूर्वकं दृढतया संघकार्यं कर्त्तुमुपदिशन्तिस्म गुरवः। भावपूर्णमाह्वानं कुर्वन्ति-स्म। क्रमोऽयं मईमास्य 16 तः 25 दिनाङ्कं यावत्प्रचलितः। अनन्तरं तदप्यसंभवमेवाभूत्। तदनन्तरं कार्यालये आगत्य तेषां स्वास्थ्यादिविषयेऽ-वगन्तुं विभिन्नप्रान्तीयाः संघकार्यकर्त्तारआगच्छन्ति-स्म। क्रमिकोऽयं प्रवाहः प्रचलन्नासीत्।

तैर्मिलितुं राष्ट्रसेवासमितेः संचालिका वंदनीया मौसी केलकर महोदया यदा 3-6-73 दिनाङ्के समागता तदा गुरुभिरर्थपूर्णया दृष्ट्या कथितं ''पूर्णरूपेणाहं सज्जोऽस्मि।'' जूनमासस्य चतुर्थे दिने रात्रौ यदा सहकार्यकर्त्ता अभ्यङ्गनार्थं तैलपात्रमादाय समागतः परं पात्रे तैलं नासीदेवेति तं दृष्ट्वा हसद्भिर्गुरुभिः कथितं तैलं समाप्तं किम्? सम्यगेव अधुना श्वः कस्य मर्दनं करिष्यसि। जूनमासस्य पञ्चमे दिनाङ्के प्रातस्तैः स्नानं कृतम्, आसने उपविश्य सन्ध्यावन्दनं कृतम्। अन्ते च रात्रौ नववादनोत्तरं पञ्चमिनिटात्मके प्रदीर्घः श्वासो बहिर्निर्गतः आत्मा च बन्धनान्मुक्तः।

**अवर्णनीयं दुःखक्षणम्**

जूनमासस्य षष्ठे दिनाङ्के प्रातः नागपुरस्थ महालकार्यालयसम्मुखे तेषामन्तिमदर्शनार्थं समागते-भ्यो जनेभ्यो दुःखावेग असह्य एवासीत्। श्रीमद्भिर्गुरुभिर्लिखित्वावरुद्धपत्रपुटके स्थापितानि त्रीणि पत्राण्युद्घाट्य पठितानि। महाराष्ट्रस्य प्रान्तसंघचालकैः श्रीमद्भिर्बाबा साहेब भिडेमहोदयैः प्रथमं पत्रं पठितम्, तस्मिन् सरसंघचालकदायित्वं बालासाहेब देवरस महोदयानां स्कन्धे प्रतिष्ठापित-मासीत्। अपरे द्वे पत्रे बालासाहेब देवरसमहोदयैरेव पठिते। द्वितीये पत्रे गुरुभिः सङ्केतितं यत् संघसंस्थापकानां डाक्तरमहाभागानामतिरिक्तं कस्यापि स्मारकं न वाञ्छनीयम्। तृतीयपत्रे तैर्विनयभावेन लिखितमासीत् मया ज्ञाताज्ञातेन यदि कस्यपि हृदये आधातः कृतो भवेत्तदर्थमहं करबद्धः क्षमां याचे। पत्रमिदं श्रुत्वा सहस्रशः संख्यायां तत्रोपस्थितो जनसमूहो दुःखेन विचलितोऽभूत्। सर्वेषां नयनयोरश्रूणि न्यपतन्। स्वयं बालासाहेब-महोदयानामपि कण्ठमुपरुद्धम्। पत्रेऽस्मिन् सन्ततुकारामस्याभङ्गछन्दस उल्लेख आसीत्। अस्य भावार्थः - हे! सन्तजना मम प्रार्थनां प्रभुं प्रापयन्तु यत्तेभ्यो मे विस्मरणं न भवेत्। किमधिकं वदेयं सर्वं खलु विदितमेव। तुकारामश्चरणयोर्मस्तकं संस्थाप्य कथयति मयि कृपायाश्छाया भवेत्।

अनन्तरं गुरुमहाभागानां पार्थिवंशरीरं चन्दन-चितायां संस्थाप्य मन्त्राग्निः प्रदत्तः, तदुपरि प्रज्वलितासु अग्निशिखासु श्रीगुरुमहाभागानां शरीरमपि चन्दनसमिद् भूत्वा पञ्चतत्त्वेषु विलीनमभवत्। पश्चाद् भगवाध्वजमुत्तोल्य प्रार्थना अवरुद्धकण्ठैर्गीता। भारतमातुर्जयेति घोषयित्वा संघविकीर्णानन्तरं सर्वे स्वस्थानं गताः।

अधुना रेशमबागस्थाने द्वौ महापुरुषावास्ताम्। द्राक्तरमहाभागानां स्मारकोपरि वर्त्तमाना प्रतिमा अपरश्च चन्दनचितोपरि समिद्भूत्वा प्रज्वलितो दधीचिः गुरुमहाभागः। द्राक्तरमहाभागानां मुखमण्डले स्मितेन भासते ''मे चयनं सफलं गुरुमहाभागैः संघस्य विश्वव्यापकत्वं विस्तारितमिति।''

**ब्रह्मपुरी, जयपुरम्**

---

**प्रेरकप्रसङ्गशतकम्** **षडशीतितमः प्रसङ्गः**

# क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे

**❑ सौ. आराधना धर्माधिकारी**

श्रीपुरस्य राज्ञो दिलीपसिंहस्य असामयिक्या मृत्युना तस्यैकाकी पुत्रो राजवीरसिंहः सिंहासनारूढोऽभवत्। राजवीरसिंहोऽपि पितृवदेव साहसी बुद्धिमांश्चासीत्, परमनुभवस्य न्यूनतया सङ्कटसमये व्याकुलो भवतिस्म। तदा राजमाता तत्साहसं संवर्द्धय सङ्कटान्मोचयतिस्म। पार्श्ववर्त्तिनो राज्यस्य गंगानगरस्य राज्ञो भीमसेनस्य दृष्टिः पूर्वत एव श्रीपुरं प्रति आसीत्। अन्ते एकस्मिन् दिने अवसरं प्राप्य श्रीपुरे आक्रमणं कृतवान्। उभयोः सेनयोर्घोरं युद्धमभवत्। गंगापुरस्य सेना श्रीपुरसेनातः संख्यायां विशाला आसीत्। सैन्यबलस्य लघुत्वेऽपि एतावत्कालं पिता दिलीपसिंहः स्वसाहसेन स्वसेनायाः मनोबलं संवर्द्धयन् विजयी समभवत्। परं राजवीरसिंहो नाधिकं समयं तं रक्षितुं समर्थः। दिनद्वये एव भीमसेनः श्रीपुरस्य मीलचतुष्टये स्वाधिकारं कृतवान्। एतदवलोक्य राजवीरसिंहस्य मनोबलमतीव क्षीणमभवत्।

रात्रौ यदा राजवीरसिंहः शयनसमये मातुरभिवादनार्थं गतः तदा अपश्यत् राजमातरं सूक्ष्मकाष्ठ भारेण लोहखण्डं खण्डयितुं प्रयतते।

सः अवदत्-मातः किं षट्सहस्रकाष्ठभारोऽपि लोहखण्डं खण्डयितुं न समर्थः।

राजमाता अवदत्-सत्यमुक्तं संख्याबलेन दृढता खण्डयितुं न शक्या। एवमेवास्माकं सैनिकास्त्वं च लोहवद् दृढाः। पश्य श्वः शत्रूणामधिकापि संख्या दृढतायाः सम्मुखे समर्पणं करिष्यति। राजवीरेणापरस्मिन् दिने द्विगुणितेन साहसेन युद्धे विजयः प्राप्तः। दृढमनोबलेन पराजयोऽपि विजये परिवर्त्तितुं शक्यः।

**218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्**

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

# अकादमीमुखपत्रिका संस्कृतप्रतिभा

विदन्त्येव विश्वजना यत् 2020 ईशवीयवर्षस्य पूर्वार्धो विश्वस्मिन्नपि विश्वे भीषणसंहारस्य विभीषिकामादाय सर्वेषु देशेषु मृत्युशृंखलां यां प्रारभत सा नाऽद्यापि शिथिलीभूता। भारतेऽपि कोरोनाख्यया वैश्विकमहामार्या सर्वाणि कार्यक्षेत्राणि दुष्प्रभावितानि। शिक्षाया उपर्यपि वज्रपातोऽभूत् सभा-सम्मेलनादीनि विरतानि। नगरेषु सर्वविधायाः सामाजिकजीवनचर्यायाः संरोधनं (लॉकडाउन) शासनेन कृतम्। मुद्रण-प्रकाशनादीनि कार्याणि विरतानि। पत्र-पत्रिकाणां यः प्रवाहो नूतन शताब्द्यां दृष्टिगोचरोऽभूत् स सहसैव समाप्तिं गतः। मुद्रणं न सम्भवति, प्रेषणमपि न सम्भवति। अतः पत्रिका अपि विरतिं गताः। दैनिकसमाचारपत्राण्येव जीवनाधाररूपेण जागरयन्ति स्तुत नागरिकान्।

एवं विधायां स्थितौ पुस्तकानि न प्राप्यन्ते (नूतनतया मुद्रितानि) न वा पत्रिकाः। अतः पुस्तकसमीक्षास्तम्भे किं लेखनीयमिति विचारयन्नासम्। पत्रिकासमीक्षाऽपि वैरल्यं भजति। ''भारती'' पत्रिकाऽपि यन्त्रविधया अन्तर्जालमाध्यमेन प्रसार्यते। पत्रप्रेषणविभागेऽपि शैथिल्यं दृश्यते। एवंविधायां स्थितौ सहसैव गतवर्षे प्रकाशितः केन्द्रीयसाहित्य-अकादम्या मुखपत्रिकायाः ''संस्कृतप्रतिभाया'' द्विसप्ततितम उन्मेषः (जुलाई सितंबर 2019 अवधेरङ्कः) प्राप्तो मया। पूर्वं मुद्रितोऽयं कोरोनाकालावधौ प्रेषितो ग्राहकेभ्य इति सूचना नासन्तोषं हर्षं च प्रसारयेदेव पाठकेषु।

बहोः कालादस्याः सम्पादनं विधीयते सुप्रथितेन सुधीवर्येण, कविसार्वभौमेन, कुलपतिचरेण, राष्ट्रपति-सम्मानितेन, पद्मश्रीपुरस्कृतेन डॉ. अभिराज राजेन्द्रमिश्र-वर्येणेति विदन्त्येव विद्वांसः। सम्पादकवर्येण पत्रिकाया-मस्यां सर्वविधं सर्जनात्मकं साहित्यं प्रस्तूयते। काव्यरचनाः, नूतनविधाबद्धानि काव्यानि ''वृत्तालोक'' नाम्ना, गीतिबद्धानि काव्यानि ''गीतालोक'' नाम्ना, गजलबद्धानि काव्यानि गलज्जलिकालोकनाम्ना, छन्दोमुक्तकविता छन्दोमुक्तकाव्यनाम्ना, ललितकथा ''कथालोक'' नाम्ना, नाट्यकृतिद्वयं ''नाट्यालोक'' नाम्ना, गुजराती-बांग्ला-हिन्दीतोऽनूदिता रचना ''अनुवादालोक'' नाम्ना, उपन्यासद्वयस्य क्रमिक शृंखला ''उपन्यासालोक'' नाम्ना, बालगीतानि ''शिशुकाव्यालोक'' नाम्नाऽस्मिन्नङ्के प्रकाशमानीता-नीति विविधवर्णरञ्जितेयं पत्रिका निश्चितमेव प्रमोदयेत् पाठकान्।

केन्द्रीय साहित्यअकादम्याः संस्कृतपत्रिकेयमर्ध-शताब्दीयात्रां स्मारयति, स्मारयति च प्रथमसम्पादकं युगप्रवर्तकं मूर्धन्यविद्वद्वरं डॉ. वेङ्कटराघवन्वर्यम्। अस्य नैरन्तर्यं नूनं सन्तोषावहम्।

**संस्कृतप्रतिभाः त्रैमासिकीः सम्पादकमण्डलम् चन्द्रशेखर कम्बारः, माधव कौशिकः, के. श्रीनिवासरावः, सम्पादकः मिश्रोऽभिराजराजेन्द्रः प्रकाशिका साहित्य अकादमी, रवीन्द्रभवन, 35,**

फीरोजशाह रोड, नई दिल्ली-1, अङ्कस्य मूल्यम् 40/-, वार्षिकम् 150/-.

**प्रसारणसमीक्षा-**

## वार्तावल्याः पञ्चाब्दपूर्तिः

संस्कृतसेविनस्तदिदं वीक्ष्य प्रमोदमनुभवन्ति यद् भारतसर्वकारीया प्रसारभारती आकाशवाणीतो दूरदर्शनतश्च निन्तरं संस्कृत-कार्यक्रमाणां प्रसारणं कारयति। आकाशवाणीतः प्रत्यहं प्रातः संस्कृतवार्ताः प्रसार्यन्ते। (न्यूज News) इत्यस्य कृते हिन्द्यां ''समाचार'' शब्दः प्रसिद्धः किन्तु संस्कृते समाचारा ''वार्ता'' पदेन बोध्यन्ते, ''वार्ता प्रवृत्तिर्वृत्तान्त'' इत्यमरः। संस्कृतच्छात्रा अध्यापकाश्च नियमितरूपेणेमा वार्ताः शृणुयुश्चेत्तेषां संस्कृतपरिज्ञानमभ्यासश्च सरलतया, सहजरूपेण वृद्धिं प्राप्नुयातामित्यहं सर्वदा वच्मि।

एवमेव प्रतिसप्ताहं देहलीतो डी.डी. न्यूज इत्याख्य-दूर-दर्शनाञ्चलतः ''वार्तावली'' नामकः संस्कृत कार्यक्रमः प्रसार्यते, प्रतिशनिवासरं सायमर्धहोरा पर्यन्तं, यत्र वार्ताः (समाचाराः), संस्कृतशिक्षा, साक्षात्कार-संलापादिकं, चलचित्रगतलोकप्रियगीतानां संस्कृतानु-वादप्रतियोगिता च प्रसार्यन्ते। इत्थं श्रव्य-दृश्यश्रव्या-दिमाध्यमेभ्यः संस्कृतं प्रसार्यते, विश्वजनीनरूपेण च श्रूयते, दृश्यते च संस्कृतस्नेहिभिरिति सुमहत्प्रशंसा-स्पदम्।

संस्कृतवार्तानामाकाशवाणीतः प्रसारणस्येतिहासो-ऽनेकदशकव्यापी वर्तते। कतिपयवर्षानन्तरमयमर्ध-शताब्दीं स्पृशेदिति स्पष्टम्। डी.डी. न्यूज शृंखलातो वार्तावलीप्रसारणं पञ्चवर्षपूर्वत आरब्धम्। अस्मिन् वर्षेऽस्मिन् जुलाईमासे पञ्चवर्षपूर्तिरस्य संजातेति समुद्घोषयताऽनेन कार्यक्रमेण पञ्चाब्दपूर्तिरभिन्दिता। वयमप्यस्य कार्यक्रमस्य दर्शकाः प्रशंसकाश्चाऽऽस्म। भारतीपत्रिकायामेतादृशी सूचना, समीक्षापरामर्शादिकं चाऽस्माभिरस्य प्रारम्भ एव पञ्चवर्षपूर्वं प्रत्तमासीत्। पञ्चाब्दपूर्तिमहोत्सवावसरेऽपि वयमभिनन्दामो दूरदर्शनं प्रसारभारतीं च, वर्धापयामश्च सर्वान् सहयोगिनोऽस्य कार्यक्रमस्य।

## जिनशासनकृपापाविताः पत्रिकाः

जिनशासनधुराधारिणां मुनिवर्याणां कृपया याः संस्कृतपत्रिकाः प्रकाश्यन्ते तासां परिचयो यथासमय-मस्माभिः प्रदीयत एव। अस्मिन् कोरोनाकालेऽपि ताः पत्रिकाः प्राकाश्यन्त प्राहीयन्त चेति सन्तोषावहम्। षाण्मासिकी नन्दनवनकल्पतरु पत्रिका (44), त्रैमासिकी सेतुबन्धपत्रिका (19) चाऽस्माभिरधिगता। कल्पतरौ यथापूर्वं संस्कृत-प्राकृतभाषयोः सामग्री, सेतुबन्धे च बहु-रङ्गरञ्जिता सामग्री प्रकाशिता। अहमदाबादतः प्रकाश्यत इदं पत्रिकाद्वयम्।

नारी-स्तम्भः

# नमस्तस्यै नमो नमः

❑ डॉ. राजेश्वरी भट्टः

अङ्गदेनेव दृढेन पदं स्थापयित्वा स्थितेन 'कोरोनावायरस' इति प्राणघातकेन संक्रमणे न अद्य निखिलं विश्वं विचलितं जातम्। अस्माकं देशेऽपि सप्तलक्षेभ्योऽधिका मानवाः संक्रमणेनानेन संक्रमिता बहवस्तु मृत्युमुखे प्रविष्टा जाताः। प्रबलप्रभञ्जनादस्मात् प्रकम्पितानां प्राणिनां प्राणरक्षायै सर्वकारेण आराष्ट्रे 'लॉकडाउन' इत्यादेशः प्रसारितः। अनेनादेशानुसारेण प्राणिनां कृते बहिरागमनं दण्डनीयं भविष्यति। त्रिमासेभ्यः कठोरादेशमिमं पालयन्तः प्राणिनः सर्वकार्यैर्मुक्ता, हस्तोपरि हस्तं निक्षिप्य गृहे स्थिताः। जीवनस्य कृते अनिवार्याणां असन, वसन, मनोरञ्जन, चिकित्सादीनां साधनानामभावे अस्तव्यस्तत्रस्ताः, आधिव्याधिग्रस्ताः किं बहुना केचित्तु प्राणान्त्यक्तु-मुद्यता दृश्यन्ते। अस्मिन् संकटसमये जनानां कृते **Mask** (रोगपट्टिका) **Sanitizer** शोधकद्रवादीनां रोगनिवारक औषधीनामुपलब्धये, सहैव 'लॉकडाउन' इति व्यवस्थया अव्यवस्थितानां कृते अन्न, वस्त्र, चिकित्सादीनां साधनानां सुप्रबन्धाय राष्ट्रे सर्वकारेण सह अन्ये मानवमूल्यसंरक्षकाः सहृदयाश्च समुत्थिता दृश्यन्ते। इतोप्यधिको गौरवस्य विषयोऽयं वर्तते यत् कठिनेऽस्मिन् काले न केवलं सम्पन्नाः समर्था आत्मनिर्भरा नार्यश्च समाजसेवाकार्ये तत्पराः सन्ति अपितु सततं गृहसीम्नि सीमिता नार्योऽपि आपन्नानां सहायतायै सन्नद्धाः सन्ति। राष्ट्रे प्रायः सर्वेषु प्रदेशेषु, ग्रामेषु च नारीजागरणस्य इदं अभियानं प्रवृत्तं जातम्। यत्र तत्र सर्वत्र नार्यः स्वयं सहायता-समूहानां माध्यमेन, व्यक्तिगतस्तरेण वा संकटापन्ना-नां सेवायै सन्नद्धाः सन्ति। बह्व्यः सम्पन्ना नार्यः सुखसुविधामुपेक्ष्य वातानुकूलितेभ्यः कक्षेभ्यो बहिरागत्य ग्रीष्मस्य आतपे आपन्नानां कृते अनिवार्यसाधनानां सुप्रबन्धाय प्रवर्तन्ते। उत्तरप्रदेशे 'लखनऊ' नगरे सचिवपदं (संयुक्त) विभूषयन्ती 'ऋतुसुहास' महोदया 'सामूहिकपाकशालाया' माध्यमेन प्रतिदिनं 1200 जनानां कृते भोजनस्य व्यवस्थां करोति। अन्या राष्ट्रे विश्रुता गायिका, सहैव उच्चाधिकारिणः पत्नी 'मालिनी अवस्थी' गृहे निवसन्त्येव आत्मनः श्वश्र्वा सह प्रतिदिनं मध्यरात्रिपर्यन्तं साधनहीनानां कृते शतं मुखपट्टिकाः (**Mask**) सीव्यति, वितरति च। मध्यप्रदेशे छिंदवाडा नगरे निवसन्ती नातिसमृद्धा संस्कारैश्च प्रबुद्धा कर्मयोगिनी श्रीमती अलकाशुक्ला आत्मबलेन, दृढ़संकल्पेन च शतसंख्यापरिमित-महिलासमूहानां माध्यमेन नित्यं प्रतिगृहाद् दशजनानां कृते भोजनस्य प्रबन्धाय कृतसंकल्पाऽस्ति। आपन्नानां सेवायै सञ्चालितेऽस्मिन् 'नारीसेवा-संकल्पे' राजस्थानस्य नार्योऽपि मनसा, वाचा, कर्मणा, समर्पिताः सन्ति। अस्मिन् क्रमे राजस्थान-

**प्रदेशे भरतपुरनगरे स्थिते 'डीग' इत्युपनगरे 'कीर्तिक्राफ्ट' इति भव्यवस्त्रशालाया अधिष्ठात्री, आत्मनः शिल्पनैपुण्ये विश्वे विख्याता 'श्रीमतीसुमन-सिंह' अस्मिन् संकटापन्ने काले ग्रामवासिनां श्रमिकाणां कृते मुखपट्टिकानां निर्माणे वितरणकार्ये च संलग्ना दृश्यते। एवमेव उदयपुरनगरनिवासिनी 'अर्चनासिंहमहोदया' विभिन्नानां महिलासहायता-समूहानां सहयोगेन, लॉकडाउन-व्यवस्थया विचलितानां प्राणिनां कृते समुचितसाधनानां प्रबन्धे तत्परा वर्तते। जयपुरनगरे मम गृहस्य पार्श्वे स्थिते उद्याने नित्यं भ्रमन्त्यो नार्योऽपि 'लॉकडाउन' व्यवस्थया पीडितानां श्रमिकाणां, भारवाहकानाञ्च कृते स्वसामर्थ्यानुसारेण सामूहिकरूपेण अन्नादीनां प्रबन्धाय तत्परा जाताः। तासु एका आर्थिकदृष्ट्या विपन्ना नारी एककिलोपरिमितभारस्य शतं स्यूता आनीय स्वधर्मं निरवाहयत्। विषयेऽस्मिन् काले नारीणां इदं सौजन्यं सौहार्दं महनीयं प्रशंसनीयं च वर्तते। युगयुगेभ्यो नारी लोके अन्नपूर्णा रूपेणा-द्रियते। गृहे कोऽपि बुभुक्षितो न भवेदिति भावो नारीणां सहजस्वभावोऽस्ति। नूनं नारी नमस्कार्या।**

## हिन्दी में

अंगद की भांति दृढता से पाँव जकड़कर स्थित 'कोरोना वायरस' नामक प्राणघातक संकट से आज सम्पूर्ण विश्व विचलित है। हमारे भारतदेश में भी सात लाख से अधिक मनुष्य इस संक्रमण से संक्रमित हैं। बहुत से मनुष्य मृत्यु के मुख में प्रविष्ट हो गए हैं। इस भीषण झञ्झावात से प्रकम्पित प्राणियों की प्राण रक्षा के लिए सरकार के द्वारा समस्त राष्ट्र में 'लाकडाउन' आदेश प्रसारित किया गया है। इस आदेश के अनुसार मनुष्यों के लिए घर से बाहर निकलना दण्डनीय अपराध है। तीन महिनों से इस कठोर आदेश का पालन करते हुए प्राणी सब गतिविधियों से मुक्त हाथ पर हाथ रखकर घर में बैठे हुए जीवन के लिए अनिवार्य भोजन, वस्त्र, मनोरंजन चिकित्सा आदि साधनों के अभाव में अस्त, व्यस्त, त्रस्त, आधिव्याधिग्रस्त, अधिक क्या कहें कुछ मनुष्य तो प्राणत्याग करने को उद्यत दिखाई देते हैं। ऐसे संकट के समय अभावग्रस्त प्राणियों के लिए तथा आपद्ग्रस्त प्राणियों के लिए रोग निरोधक, (Mask) मुखपट्टिका (Sanitizer) शोधक द्रव तथा औषधी आदि साधनों की उपलब्धि के लिए साथ ही लॉकडाउन व्यवस्था से अव्यस्थित प्राणियों की सहायता के लिए अन्न, वस्त्रादि साधनों का प्रबन्ध करने के लिए सरकार के साथ-साथ मानव मूल्यों के समर्थक उदार हृदय वाले अनेक सहृदय व्यक्ति सहयोग के लिए सन्नद्ध हैं। इससे भी अधिक गौरव का विषय यह है कि इस कठिन संकट के समय न केवल साधन सम्पन्न, आत्मनिर्भर, नारियाँ ही इस सेवा यज्ञ में सहयोग करने के लिए उत्सुक हैं अपितु निरन्तर घर की सीमाओं में ही संकुचित नारियाँ भी अहमहमिकया वृत्ति से घर से बाहर आकर पीडितों की सहायता के लिए सामने आई। बहुत सी सुखसुविधा सम्पन्न नारियाँ वातानुकूलित कक्षों से बाहर निकलकर सुख सुविधा की उपेक्षा करती हुई गर्मी की धूप में आपत्तिग्रस्त मानवों के लिए अनिवार्य साधनों की व्यवस्था के लिए इधर उधर जाती हैं। उत्तर प्रदेश के

लखनऊ नगर में संयुक्त सचिव पद पर स्थित ऋतु सुहास महोदया 'सामूहिक पाकशाला' के माध्यम से प्रतिदिन 1200 व्यक्तियों के लिये भोजन की व्यवस्था में संलग्न है। राष्ट्र की विश्रुत गायिका एवं उच्चाधिकारी की पत्नी श्रीमती 'मालिनी' अवस्थी अपनी सास के साथ प्रतिदिन मध्यरात्रि तक साधनहीनों के लिए 100 मुखपट्टिका (Mask) सीती है तथा उनका वितरण करती है। मध्यप्रदेश के 'छिंदवाड़ा' नगरनिवासिनी कर्मयोगिनी अलका शुक्ला यद्यपि आर्थिक दृष्टि से समृद्ध नहीं है किन्तु अपने प्रबुद्ध संस्कारों के कारण आत्मबल एवं दृढ़संकल्प से 100 महिला समूहों के सहयोग से नित्य प्रतिघर से दश व्यक्तियों की भोजन व्यवस्था कर रही है। 'कोरोना वायरस' के कारण पीडित व्यक्तियों के लिए प्रारम्भ किये गये इस सेवा अभियान में राजस्थान की निष्ठावती नारियों का भी महत्त्वपूर्ण योगदान है। इस क्रम में भरतपुर जिले में स्थित 'डीग' नगर में 'कीर्तिक्राफ्ट' नामक विशाल वस्त्रशाला की अधिष्ठात्री अपने शिल्पनैपुण्य के लिए देश विदेशों में प्रतिष्ठित श्रीमती सुमनसिंह इस संकट के समय श्रमिकों के लिए एवं ग्रामवासियों के लिए मुखपट्टिका का निर्माण कर अपना सहयोग प्रदान कर रही है। इसी प्रकार उदयपुर नगर में सेवाकार्य के लिए सर्वथा समर्पित 'अर्चनासिंह' महोदया महिलासहायतासमूहों के माध्यम से 'लॉकडाउन' व्यवस्था से अव्यवस्थित प्राणियों के लिए समुचित साधनों के प्रबन्ध में व्यस्त होकर अपनी सेवा प्रदान कर रही है। जयपुर नगर में मेरे घर के पास स्थित उद्यान में नित्य भ्रमण करने वाली नारियों ने लॉकडाउन व्यवस्था से पीड़ितों की सहायता के लिए भोजन सामग्री एकत्रित करने की योजना बनाई, इन नारियों में अर्थाभाव के कारण एक स्वाभिमानिनी नारी ने एक-एक किलोग्राम के सौ नमक के पैकेट देकर अपना सहयोग प्रदान किया। भारतीय नारियों का यह सौजन्य सौहार्द निश्चय ही सहनीय एवं अभिनन्दनीय है। नारी युगयुगों से लोक में अन्नपूर्णा के रूप में आदर को प्राप्त करती रही है। घर में कोई भी भूखा न रहे-ऐसा नारी का सहज स्वभाव है। निश्चय ही नारी नमस्कार करने योग्य है।

-सी-276, भाभा मार्ग, तिलकनगर, जयपुर


## ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-

**भारती पत्रिका का वार्षिक शुल्क रुपये 120/-, पंचवर्षीय शुल्क 500/-, आजीवन सदस्यता (15 वर्ष) शुल्क 1500/- मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई-मेल से या डाक द्वारा भिजवा देवें।**

**खाते का नाम - भारती**

**खाता संख्या - 2139101912502**

**IFS Code - CNRB0002139**

आयुर्वेद-स्तम्भः

# कोरोनाकालेऽस्मिन्वर्षर्तौ चर्याविशेषाः

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**संपूर्णे ह्यस्मिन्भूमंडल एकमात्रो विशिष्टोऽयं भारतदेशः यत्र ऋतूनामागमनम्भवति क्रमेण नियत-रूपेण च, यद्यपि संपूर्णे भारतवर्षे ऋतुचक्रेस्मिन् समत्वं न वर्तते, पुनरपि न्यूनाधिकरूपेण सर्वर्तू-नाम्विशेषेण तु शीतोष्णवर्षात्मकानां संस्थितिः सर्वत एव। आयुर्वेदशास्त्रं जीवनशास्त्रं वर्तते यत्र हि सर्वेषां नियमानां नियमनं, प्रणयनं, विचरणं, प्रसरणं च मानजीवनमधिकृत्यैव निर्दिष्टम्। कोरोनानामकस्य विशिष्टस्य व्याधेरस्य संक्रमणकालोऽयं वर्तते, अतः समागतेऽस्मिन्वर्षर्तौ विशेषेण चर्यायाः परिपालनं कोरोनाव्याधिमधिकृत्य करणीयम्।**

इस संपूर्ण भूमंडल पर यह एक मात्र विशिष्ट देश भारत देश है जहाँ ऋतु का क्रम से निश्चित रूप से आगमन होता है, यद्यपि संपूर्ण भारतवर्ष में एक ऋतुचक्र में साम्यभाव या एकरूपता नहीं है फिर भी न्यूनाधिकरूप से तो संपूर्ण ऋतुओं की तथा विशेष रूप से तो शीत, उष्ण एवं वर्षा स्वरूप ऋतु की संस्थिति है ही। आयुर्वेदशास्त्र जीवनशास्त्र है जहाँ पर संपूर्ण नियमों का नियमन, प्रणयन, विचरण और प्रसरण मानव जीवन को अधिकृत कर के ही निर्दिष्ट किया गया है। कोरोना नामक विशिष्ट व्याधि का यह संक्रमण काल है, अतः आगे आ रही इस वर्षा ऋतु में विशेष रूप से ऋतुचर्या का परिपालन कोरोना व्याधि को ध्यान में रखकर करना चाहिए।

**यद्यपि कोरोनानामकस्य व्याधेरपवारणमेव केवलं प्रथमोपचारस्वरूपकं वर्तते, आचार्यः सुश्रुतोऽपि संक्रामकरोगाणां प्रसरणप्रक्रियायामप-वारणमेव कथयति यत्-**

**प्रसङ्गाद्गात्रसंस्पर्शान्निःश्वासात्सहभोजनात्।**
**सहशय्यासनाच्चापि वस्त्रमाल्यानुलेपनात्।**
**कुष्ठं ज्वरश्च शोषश्च नेत्राभिष्यन्द एव च।**
**औपसर्गिकरोगाश्च सङ्क्रामन्ति नरान्नरम्।**

यद्यपि कोरोना व्याधि का अपवारण या बचाव ही केवल प्रथमोपचार स्वरूप है आचार्य सुश्रुत भी संक्रामक रोगों की प्रसरण-प्रक्रिया में कहते हैं कि निरंतर संपर्क करने से, गात्र के संस्पर्श से, निःश्वास से साथ भोजन करने से, एक शय्यापर शयन करने से, साथ बैठने से वस्त्र-माला एवं अनुलेपन से कुष्ठ, ज्वर, शोष एवं नेत्राभिष्यन्द इत्यादि औपसर्गिक-रोग एक व्यक्ति से दूसरे व्यक्ति में संक्रमण करते हैं।

**अत्र अवधेयमिदं वर्तते यत् न हि सर्वे जनाः औपसर्गिकरोगैराक्रांताः भवन्ति समानरूपेण। येषां शरीरेषु विशेषेण व्याधिसहत्वं क्षमत्वं वा वर्तते तेषु सामान्यतया संक्रमणं घातकं न भवति। यदा ते संक्रांता भवन्ति तदा तेषु तेषु शरीरेषु ''अणुविकार-जननम्'' भवति, अत एव विशेषरूपेण व्याधिक्षमत्वं शरीरे संस्थापनीयम्। यथा ह्याचार्यश्चरकः कथयति यस्मिन्यस्मिन्शरीरे व्याधिक्षमत्वं विशेषेण भवति तस्मिन्तस्मिन् शरीरे व्याधेराक्रमणमपि तदनुरूपमेव भवति, अतएव शरीरे विशेषेण विकार-विघात-कराणां भावानाम्विशेषेणाभिवृद्धिर्भवेदेता-दृग्विधः प्रयत्नो विशेषेण करणीयः। प्रयासेस्मिन् ऋतुचर्यायाः परिपालनं प्राथमिकरूपेण करणी-यम्वर्तते।**

यहाँ यह ध्यान देने योग्य बात है कि सभी लोग औपसर्गिक रोगों से समान रूप से आक्रांत नहीं होते,

जिनके शरीरों में विशेष रूप से व्याधिसहत्व या व्याधिक्षमत्व होता है उनमें सामान्यतया संक्रमण घातक नहीं होता है। वे संक्रांत होते हैं तब उन उन शरीरों में अणुविकार जनन होता है अर्थात् व्याधि अल्प स्वरूप में उत्पन्न होती है इसलिए शरीर में विशेष रूप से व्याधिक्षमत्व की स्थापना करनी चाहिए, जैसा कि आचार्य चरक कहते हैं कि जिस जिस शरीर में व्याधिक्षमत्व विशेष रूप से होता है उस उस शरीर में व्याधि का आक्रमण भी उसके अनुरूप ही होता है इसलिए शरीर में विशेष रूप से विकारविघातकर भाव की विशेष रूप से अभिवृद्धि हो जाए इस तरह का प्रयत्न विशेष रूप से करना चाहिए। इस प्रयास में ऋतुचर्या का परिपालन प्राथमिक रूप से करना होता है।

**1. आयुर्वेदीयचिकित्सकेन सह परामर्शं विधा-यानुवासनस्यास्थापनस्य च समुचितरूपेण प्रयोगः सर्वोत्कृष्टः भवति तथा शरीरे व्याधिक्षमत्वं विशेषेण जायते।**

**आचार्यश्चरकः कथयति -**

**तत्रास्थापनानुवासनं तु खलु सर्वत्रोप-**
**क्रमेभ्यो वाते प्रधानतमं मन्यन्ते भिषजः,**
**तद्ध्यादित एव पक्वाशयमनुप्रविश्य केवलं**
**वैकारिकं वातमूलं छिनत्ति;**
**तत्रावजितेऽपि वाते शरीरान्तर्गता वात-**
**विकाराः प्रशान्तिमापद्यन्ते,**
**यथा वनस्पतेर्मूले छिन्ने स्कन्धशाखाप्ररोह-**
**कुसुमफलपलाशादीनां नियतो विनाशस्तद्वत्।।**
**( च.सू. 20/13 )**

**अतः निश्चितरूपेणास्थापनस्यानुवासनस्य च-विशेषेण प्रयोगः वर्षाकाले करणीय एव। यतो हि वर्षाकाले विशेषेण वातस्य प्रकोपो भवति तस्य शमनन्त्वनुवासनास्थापनाभ्यां भवति।**

आयुर्वेदीय चिकित्सक के साथ परामर्श करके अनुवासन एवं आस्थापन का प्रयोग विशेष रूप से वर्षा काल में करना चाहिए। अनुवासन का एवं आस्थापन का समुचितरूप से प्रयोग सर्वोत्कृष्ट होता है इससे शरीर में व्याधिक्षमत्व विशेष रूप से उत्पन्न होता है, आचार्य चरक कहते हैं कि-

इसमें वैद्यगण आस्थापन और अनुवासन को सभी उपक्रमों से वात दोष में प्रधान मानते हैं, वे दोनों प्रारंभ से ही पक्वाशय में प्रवेश कर संपूर्ण वैकारिक मूल का छेदन करते हैं, वहाँ वात का अवजयन करने पर शरीरान्तर्गत वातविकार भी शांति को प्राप्त हो जाते हैं, जिस प्रकार से वनस्पति के मूल को छिन्न कर देने पर स्कंध, शाखा, अंकुर, पुष्प, फल, पत्र इत्यादि का नियत रूप से विनाश होता है उसी प्रकार से वात दोष से उत्पन्न रोगों का भी विनाश हो जाता है।

अतः निश्चित रूप से आस्थापन एवं अनुवासन का विशेष रूप से प्रयोग वर्षाकाल में करने योग्य होता है। क्योंकि वर्षाकाल में विशेष रूप से वात दोष का प्रयोग होता है उसका शमन तो अनुवासन और आस्थापन से हो जाता है

**2. वर्षर्तौ विशेषेण च जलदुष्टिर्भवत्यत एव सर्वदा शुद्धस्यैव जलस्य सेवनं करणीयम्।**

वर्षा ऋतु में विशेष रूप से जलदुष्टि होती है इसलिए सर्वदा शुद्ध जल का ही सेवन करना चाहिए।

**3. व्युषितं भोजनं सर्वथा परिहर्तव्यम्।**

व्युषित भोजन का सर्वथा परिहार करना चाहिए।

**4. मुद्गयूष, पेया, विलेपीत्यादीनाञ्च लघू-नाम्पुष्टिकराणां द्रवप्रधानानां सद्योविनिर्मितानां किंचिदुष्णानां प्रयोगः सर्वोत्कृष्टः भवति।**

मुद्गयूष, पेया, विलेपी इत्यादि लघु एवं पुष्टिकर द्रवप्रधान सद्योविनिर्मित एवं कुछ उष्ण भोज्य पदार्थों का

प्रयोग ही सर्वोत्कृष्ट होता है।

**5. भोजनस्य संस्कारेऽपि विशेषेण मधुप्रयोगः करणीयः।**

भोजन के संस्कार में भी विशेष रूप से मधु का प्रयोग करना चाहिए।

**6. कदाचित् स्वेच्छया सावधानतया च प्रथमं वृष्टं विहाय वर्षाजले स्नानं न हानिकरं भवति। यदि चेदनिच्छया विवशतायां वर्षाजले पूर्णरूपेणाधिक-कालपर्यन्तं वर्षाजलेन सम्पीडितो भवति तदा तु विशिष्टानामुष्णानां पेयानां प्रयोगः परमावश्यको-ऽस्ति।**

कभी-कभी स्वेच्छा से सावधानीपूर्वक पहली वर्षा को छोड़कर उसके बाद के वर्षा जल से स्नान करना हानिकारक नहीं होता है यदि अनिच्छा पूर्वक या विवशता में वर्षा जल में पूर्ण रूप से अधिक काल पर्यंत व्यक्ति भीग जाता है तब तो विशिष्ट उसके पेय पदार्थों या कषायों का प्रयोग आवश्यक हो जाता है।

**7. यथा विंशतिसंख्याकानां मरिचानां विंशतिरेव तुलसीपत्राणां ग्रहणं कृत्वा 400 मिलीलीटर-परिमिते जले समुत्क्वाथ्य अर्धावशिष्टे सति सितां सम्मिश्र्येमं कषायमुष्णमेव पिबेत्तदा**

20 की संख्या में काली मिर्च को लेकर एवं 20 ही तुलसी पत्रों को लेकर 400 मिलीलीटर पानी में उबालकर आधा अवशिष्ट रह जाने पर उसमें मिश्री मिलाकर इस कषाय को गर्म ही पीना चाहिए।

**8. हरिद्रां चित्रकं निम्बमुशीरातिविषेवचाम्।।**
**कुष्ठमिन्द्रयवान्मूर्वां पटोलं चापि साधितम्।**
**पिबेन्मरिचसंयुक्तं सक्षौद्रं कफजे ज्वरे।।**

हरिद्रा, चित्रक, निम्ब, उशीर (खस), अतिविषा, वचा, कुष्ठ, इन्द्रयव, मूर्वा और पटोल (परवल के पत्ते) इनसे बनाया गया काढा काली मिर्च मिलाकर एवं शहद मिलाकर कफ ज्वर में देना चाहिए।

**9. नागरं धान्यकं भार्गीमभयां सुरदारु च।**
**वचां पर्पटकं मुस्तं भूतीकमथ कट्फलम्।।**
**निष्क्वाथ्य कफवातोत्थे क्षौद्रहिङ्गसमन्वितम्।**
**दापातव्यंश्वासकासघ्नं श्लेष्मोत्सेके गलग्रहे।।**
**हिक्कासुकण्ठश्वयथौ शूले हृदयपार्श्वजे।।**

सोंठ, धनिया, भारंगी, हरडे देवदारु, वचा, पित्तपापड़ा, नागरमोथा, रोहिषघास और कायफल इन सब को समान मात्रा में लेकर क्वाथ बनाकर थोड़ा शहद और हींग मिलाकर कफ और वात से उत्पन्न होने वाले ज्वर में देना चाहिए। यह श्वास और कास को नष्ट करता है बार-बार आने वाले में लाभदायक है, गले में जकडाहट हो तो लाभदायक है, हिक्का में, कंठ में होने वाले शोथ में और हृदय तथा पार्श्व में होने वाले शूल में लाभदायक है।

**10. किराततिक्तममृतां द्राक्षामामलकं शटीम्।**
**निष्क्वाथ्य वातपित्तोत्थे तं क्वाथं सगुडं पिबेत्।।**

चिरायता, गिलोय, मुनक्का, आँवला, कचूर इन पांचों को समान भाग लेकर (प्रत्येक चार 4 ग्राम की मात्रा में लेकर) काढ़ा बनाकर वात एवं पित्त से उत्पन्न होने वाले ज्वर में इस क्वाथ को गुड़ मिलाकर पीवे।

**11. रास्नावृक्षोऽथ त्रिफला राजवृक्षफलैः सह।**
**कषायः साधितः पीतो वातपित्तज्वरं जयेत्।।**

रास्ना, अडूसा के पत्ते, त्रिफला एवं अमलतास इन चारों को प्रत्येक को पांच 5 ग्राम लेकर काढ़ा बनाकर पिया जाए तो वह वात एवं पित्त से होने वाले ज्वर को जीतता है। निरापदात्मकाः ह्येते सर्वे कषायाः। ये सभी कषाय निरापद हैं।

**80, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2018-20

हार्दिक शुभकामनाओं सहित :-

निर्माता

**ए इन्फ्रास्ट्रक्चर लिमिटेड**

**एस्बेस्टोस सीमेन्ट पाइप्स**

**सस्ता, मजबूत एवं टिकाऊ**

सर्वोत्तम 'माजा' तकनीक द्वारा निर्मित पेयजल, कृषि, बोरवैल, सीवरेज एवं ड्रेनेज में उपयोगी तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ

**एवं**

निर्माता

**एस्बेस्टोस सीमेन्ट शीट्स**

**छत एक, लाभ अनेक**

उच्च गुणवत्ता की फाइबर सीमेन्ट की नालीदार चादरें

कारखाना : हमीरगढ़ - 311025, जिला भीलवाड़ा (राजस्थान) दूरभाष: 01482-286102-07
दिल्ली कार्यालय : ए-९ए, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26961849/26965673
जयपुर कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड, जयपुर-302001 फोन: 0141-4019691/2370566
ईमेल आईडी : jaipur@kanoria.org (Pipe Dn.), sharma.ashok@kanoria.org (Sheet Dn.)

**राष्ट्रीय विचारों के लिए पढ़ें**

(हिन्दी) साप्ताहिक
**पाञ्चजन्य**

(English) Weekly
**ORGANISER**

हमारी विशेषताएं




- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा




You can subscribe Panchjanya/Organiser Weeklies online through our Websites: www.panchjanya.com, www.organiser.org

वार्षिक ग्राहक शुल्क
भारत में ₹ 700/- पाञ्चजन्य ₹ 800/- ORGANISER (साधारण डाक द्वारा)
विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

**प्रसार विभाग**
**भारत प्रकाशन (दिल्ली) लिमिटेड**
2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली- 110055
फोन : 011-47642000,01,02, ई-मेल: circ@bpdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम्
अध्यक्षः शंकरप्रसादशुक्लः प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा श्याम प्रिन्टर्स, किशनपोल बाजार, जयपुरम्
दूरभाषः 0141–4001974 पत्रसंकेतः– भारतीभवनम्, बी–15, न्यू कॉलोनी, जयपुरम्–302001
दूरभाषः 0141–2379014

प्रतिष्ठायाम्,